भक्ति

पितृन्तर्प्पणी श्राद्धकल्पोवा

८१६

नं० ४६८५
सिद्धान्तकौमुदी
४६ पत्राणि
शब्दरूपाणि-स्त्रीलिङ्ग
कर्ता :- भट्टोजिदीक्षित
लि० सं० १९२८ वि०

॥श्रीकृष्णायनमः॥ ॥प्रणम्यवासुदेवायतन्यतेस्वर्गरंगिणी॥ श्रीवाचस्पतिधीरेणपितृभक्तितरंगिणी। वराहपुराणेकंठस्था
नगतोजीवोभीतोविभ्रांतमानमः॥ ज्ञात्वातुविकलंतत्रशीघ्रंनिःसार्यतेगृहात्। कुशास्तरणशायीसदिशःसर्वास्तुपश्यतिमू
१ मूर्षुर्विसंज्ञोभगवन्गृहाद्बहिः कृत्स्नस्तुचौरेशोऽम्बनावृतेऽत्रास्तृतदर्भेशायितव्यः अथवैषपरिच्छिन्नः गंगाप्रवाहेऽन्तर्नाभिज
लयोगंकारयितव्यः ततःपुरुषसूक्तादिकमुच्चैःश्रावयितव्यस्तावद्यावत्प्राणांस्त्यजति ततोवाससाछादयेद्दृष्ट्यंस्थापयि
तव्यः ततस्तंस्नातगंपरिशिष्टं घृतेनाभ्यक्तमाल्यानुश्रुत्वस्त्रोपवीतिनं चन्दनोक्षितसर्वांगंसुमनोभिर्विभूषयेत्॥ हिरण्यस
कलान्सप्तसुच्छिद्रेषुसप्तसु मुखेनाथपिधायैनंनिर्हरेयुःसुतादयः सप्तस्वतिनासिकयोश्चक्षु। षोश्रोत्रयोर्मुखेचसर्थः
यद्यपिच्छिद्रसप्तकेहिरण्यप्रवेशनमिदंसाग्नेरुक्तंतथापिनिरग्नेरप्याचरन्तिमुखेनाथपिधायेति शवोवाससापिहितमुखो
गुरुमनुज्ञाप्यनिर्हरणीयइत्यर्थः अथश्मशानेशुचौदेशेआस्तरणस्थंशवंधृत्वामज्जनंकृत्वाब्राह्मणानीतेनस्वागतेनकाष्ठे
नपुत्राद्यपश्चितांकुर्युः अथचितायांनिपन्नायांसुधिः सुवासाःपुत्रश्राध्वांतःकृतापसव्यः। ॐगयादीनिचतीर्थानियेचपुण्याः
शिलोच्चयाःकुरुक्षेत्रंचगंगांचयमुनांचसरिद्वरांकौशिकींचन्द्रभागांचसर्वपापप्रणाशिनींभद्रावकाशांशरयूंगंडकींतमसांतथा
धैनवंचवराहंचतीर्थंपिंगारकंतथा पृथिव्यांयानितीर्थानिचतुरःसागरांस्तथा इतिमंत्रंपठित्वाकुशोदकेनशवशिरः॥ ७॥

वारत्रयमभिषिंचेत् प्रत्यभिषेकमन्त्रपाठः ध्यात्वातुमनसासर्वैःकृतस्नानंगतायुषं देवाश्चाग्निमुखाःसर्वेगृहीत्वातुहुता-
शनं।गृहीत्वापाणिनाचैवमंत्रमेतमुदाहरेत् ॐ कृत्वातुदुष्करंकर्मजानतावाप्यजानता मृत्युकालवशंप्राप्तंनरंपं-
चत्वमागतं धर्माधर्मसमायुक्तंलोभमोहसमावृतं दहेयंसर्वगात्राणिदिव्यान्लोकान्सगच्छतु इतिमंत्रंपठित्वाप्रद-
क्षिणीकृत्यमुखउल्कास्यवह्नियोगःकर्त्तव्यः।एवमुक्त्वाततःशीघ्रंकृत्वाचैवप्रदक्षिणंज्वलमानंतथावह्निंशिरःस्था-
नेप्रदापयेत् चतुर्वर्णेषुसंस्कारएवंभवतिपुत्रकगयादीनीतिगयादीनितीर्थानिस्मृत्वातानिस्नानकरणीभविष्यतिजले
मनसाध्यात्वातेनैवजलेनपुत्रःशवभूतंपितरंस्नापयेत् प्रोक्षयेच्च ततोनवंशुक्लंशुक्लंवासोयुगंपरिधाप्यचन्दनपुष्पैर-
लंकृत्यचितायामास्तृतकुशायांतुनरशिरसमधोमुखंपुरुषंस्त्रियमुत्तानांपुत्रादिःशाययेत् ततोधिकारीपुत्रःपितुःशिरः
सन्निधानेपूर्वाभिमुखउपविश्यगयादीनीत्यारभ्यगृहीत्वातुहुताशनमिमंतंमन्त्रंपठित्वाएनंदहेत्त्वित्यभिधाय ॐ कृत्वा
तुदुष्करंकर्मइत्यादिदिव्याल्लोकान्सगच्छत्वित्यन्तंपठित्वादक्षिणहस्तेनज्वलंतीमुल्कामादायशीघ्रंचितांप्रदक्षिणीकृत्यशि-
रःस्थानमागत्यपूर्वाभिमुखउपविश्यपितुरुत्तमांगप्रदेशेतमुल्काग्निंसंयोजयेत् ततस्तावद्दहेद्यावत्कयोतशेषःशवस्ति-
ष्ठेत् ततःसप्तसमिधमादायचितांप्रदक्षिणीकृत्यक्रव्यादायनमइतिमंत्रेणएकांसमिधंचितामुखेप्रक्षिप्यउल्कायांकुठा-

पित० रेण एकं प्रहारं कुर्यात् एवं चित्ताप्रदक्षिणा समित्प्रक्षेप कुठारप्रहारो द्वितीयस्तृतीयोप्येवं चतुर्थोप्येवं पंचमोप्येवं षष्ठोप्ये
वं सप्तमोप्येवं ततः कनिष्ठपुरस्सरा ज्येष्ठपश्चिमा दीर्घैकपंक्त्यावस्थिता श्चितामप्रेक्षमाणाः अहरहर्नयमानो गामश्वं पुरु
२ षं पशुं वैवस्वतो न तृप्यति सुराभिरिव दुर्मतिरिति यमगाथां गायंतो नंदीसरो वा उद्दिश्य गच्छेयुः नावेक्षितव्यः कव्यादोगंतव्या
वत तो न दीति वचनात् तथा च वैजवापः प्रेतमरतं पंगत्वा यथोक्तमग्निं गमपित्वा अनवेक्षमाणा पांसेकवाससो वीतीभूताः
।। कनिष्ठप्रथमा पापमुगाथां गायंतो यमसूक्तं च जपंतो अहरहर्नयमानो गामश्वं पुरुषं पशुं वैवस्वतो न तृप्यति सुराभिरिव दुर्म
तिरिति अरण्यं श्मशानं अनवेक्षमाणाः अरण्यमिसनुषसते वीतीभूताः अप्रेणीभूताः कनिष्ठपरस्सरा ज्येष्ठपश्चिमा इतिया
वत् । यपुर्वालपुरस्सरा इत्यन्योक्तेः अहरहरित्यादिपितृगाथा दुर्मतिर्मघपः आश्वलायनः सव्यावृत्तयो व्रतं सनवेक्षमाणाप
त्रो दक्रमवहम्रवतीति । सव्यावृतपर इति वामावर्त्तनपांती सर्पः उदकमवहतततगगाघुद्दकमुद्दिश्य पांती सर्पः पारस्करः । संयुक्तं
मिथुनं पावेरस्त्र एकं करिष्याम इति कुरुध्वं मावैवं पुनरित्स शतवर्षमिते कुरुध्वमेवेतरस्मिन् सर्वे ज्ञातयोप्यपयांति आसप्तमा
त् पुरुषात् दशमाद्वा समानग्रामवासे यावत् संबंधमनुस्मरेयुर्वा एकवस्त्राः प्राचीनावीतिनः सव्यानामिकापाप आलोमप्रप्लवनः
शोशुचदघमिति दक्षिणामुखा निमज्जंति प्रेतायोदकं सकृत् प्रतिसिंचेयुः अंजलिना सावेत्रत इति संयुक्तं केनचित् संबंधेन संवर्द्धनुत्तर

घनक्षमं मिथुनं स्त्रीपुरुषौ पाच्यमाहः उदकं करिष्यामीति कुरुध्वमिति द्वितरस्मिन् शतवर्षे प्रेते एवं पुनर्मा कुरुध्वमिति मिथुन ब्रूते
इति सर्वे प्रेतस्य तत्र ग्रामस्याः सर्वे सपिंडाः सर्वे समानोदका वा सर्वे सगोत्रा वा तदा मिलित्वोदकं कुर्युः स्नानक्रममाह एकवस्त्रा इति।
उत्तरीयशून्याः इदं तु ब्राह्मणमात्रपरं सर्व इति अपनः शोशुचदघमिति मंत्रं स्त्रियो न पठेयुः तासां वेदपाठानधिकारात्। अप
नः शोशुचदघमिति मंत्रं पठित्वा वा पानासिकया जलमालोड्य दक्षिणामुखाः प्रेतं ध्यायंतः सकृन्निमज्जेयुः परिहितमेव वस्त्रं
प्रक्षाल्य पुनः परिधाय निमज्जनमिदं तथैव ब्रह्मपुराणात् तथाहि आर्द्रे च वस्त्रे प्रक्षाल्य तेनैवाच्छादितस्ततः कर्तव्यं तैः सचे-
लं तु स्नानं सर्वमलापनोदाय ॐ अद्यामुकगोत्र पितरमुक सपिंड समानोदक सगोत्र अमुकशर्म प्रेत एष तिलतोयांजलिस्ते मया
दीयते तवोपतिष्ठतामिति सर्वे दद्युः भीजलांजली त्रिर्वे पेत्ताव स्वभ्रसेकादशाहे विरमेदिति पेठीनसिना मरणदिनादारभ्याशौचांते
यावत् प्रत्यहमंजलित्रयदानकथनं तदधिकफलार्थं स्नानार्थं जलप्रवेशः स्यात् शौचच्छेन कार्यः जलादुत्तरणं तु आर्द्रवालेन कार्यं ज
लेऽश्रु गोड्ढर्षणं न कार्यं तदाह शंखः यथा वद्धम वतीर्थनां गं घर्षयेदिति बौधायनः बालं पुरस्कृत्य तीर्थाद्दिक्तीर्यवामं तीति अथ
प्रवेशनं तत्र पारस्करः प्रेतस्पर्शिनो न ग्रामं प्रविशेयुरानक्षत्रदर्शनात् प्रत्यैवेदादित्यस्य अन्हि प्रेतस्पर्शिनो नक्षत्रदर्शनानंतरं रात्रौ तु
प्रेतस्पृशः सूर्योदयानंतरं ग्रामं प्रविशेयुरित्यर्थः प्रविशंश्च समं गोभिर्ग्रामं नक्षत्रदर्शने कटकर्म ततः कुर्युर्भूमौ प्रस्तरशायिन इति कार्या

पित०
३
3

नुरोधात्तु प्रागग्निप्रवेशनमाह हारीतः ब्राह्मणाननुमत्यावेति याज्ञवल्क्यः इति संचिन्त्य गच्छेयुर्गृहे बालपुरस्सराः प्रविश्य निंबपत्राणि
शनकैर्द्वारि वेश्मनः आचम्याग्न्यादि सलिलं गोमयं गौरसर्षपान् प्रविशेयुः समालभ्य कृत्वाश्मनि शनैः पदं सर्व एव प्रेतस्पर्शिनो गृ
हद्वारि पादौ प्रक्षाल्य निंबपत्राणि दन्तैः खंडयित्वा आचम्य ॐ अग्निर्नः शर्म यच्छत्विति अग्निं स्पृष्ट्वा अग्न्यादिस्पर्शे वैजवापः शमीमा
लभन्ते शमी पापं शमयत्विति अश्मानमालभन्ते ॐ अश्मेव स्थिरो भूयासं अग्निं ॐ अग्निर्नः शर्म यच्छत्विति आश्वलायनः प्राप्य
सद्रोऽश्मानमग्निं गोमयमक्षतांस्तिलमप उपस्पृशन्ति सत्ते गृहं गोमुपाक्षततिलजलानां स्पर्शो मंत्रकृतएव आश्वलायनः नैवास्यां रा
त्रावन्नं पचेयुः त्रिरात्रमक्षारलवणाशिनः स्युः द्वादशरात्रं महागुरुषु न पचेयुरिति अपंचपाकनिषेध एव न तूपवासविधिरपि प्रचेतो
न्हितत्रीपेचसमनेनैवमेतया ज्ञातिभिः सह भोक्तव्यमेतस्मै तेषु दुर्लभमिति मरीचिवचनेन सकलकुलस्यैव भोजनविधानादिति के
चित् तत्र प्रथमस्तरेऽहमनश्नन्त आसीरन् क्रीतसन्नेन वा वर्तेरन् त्र्यहमिति वसिष्ठवचनेन अहोपवासविधानात् एवं च शक्तस्य अहोपवासः त
दशक्तौ तु उपवासापकर्षः असंतानशक्तस्य प्रथमदिनेऽपि भोजनं तत्रापि पाकाभावो निपतः किंतु अयाचितस्य लब्धस्य वा फलमूलादेर्भोज
नं तत्रैव मरीच्युक्तं बंधुस्तातिसमितितत्वं मरणदिनस्यैव रात्रौ त्रिकष्टिकायां एकपुटके क्षीरं कृत्वा अपरपुटके पानीयं कृत्वा आकाशे धार्यं
तां रात्रिं क्षीरोदके विलपसिद्धघुरिति वचनात् एतत्पूर्वमेव दशरात्रव्यापकाकाशघटदानं तूष्णीतस्फलं तु दाहजलनित संतापशमनं॥

३

तथामनुःयथामनजनितश्रमशांत्यर्थंचेति तस्मान्निधेयस्माकाशेदशरात्रंपयस्तथासर्वथातायस्तांसथमिध्वम्भ्रमशांत्यर्थंचे
तिवचनात् आमिषभक्षणरात्रिभोजनयोषिदुपभोगनिषेधस्तु दशरात्रंपुत्राणांसपिंडानांचसाधारणःमत्स्यादिभक्षणनि
षेधे गौतमःमत्स्यमांसादिभक्षेपुराप्रदानादितिप्राप्यासननिषेधस्तु दशरात्रंपुत्राणांसपिंडानांचसाधारणःमत्स्यादिभक्षण
निषेधकाण्यायिसपाणिलंचदशाहपुत्राणामेव सपिंडानांतुचतुर्थदिनपूर्तिपर्यंतशय्यासननिषेधः तृतीयपंचमसप्तमनवमाहे
षुगतेषांत्तैलाभ्यंगोगसंवाहनंसहभोजनंच दशरात्रंतुसर्वेषांदिवैवभोजनं क्षौरंतुसपिंडानामेव दशमेहनितेषामेवाशौचान्ता
न्तःदपिकनिष्ठानामेव अनुभाविनामिसापस्तंबवचनात् क्षालनार्थंतुवस्त्रस्नानगोद्विजानामशौचोपांसदिने शूद्राणांतुअशौ
चांतादिने पावदशौचंप्रेतायतिलोदकदानंदीपदानंजागरणंज्ञातिभिःसहभोजनंच रोदननिषेधस्तुयावदशौचंसर्वेषांअशौचसं
करेतुअल्पदिनव्यापकंलघुबहुदिनव्यापकंतुगुरुतयोःसंकरेगुरुणांव्यतीतेनशुद्धिः जननेप्येवं समानदिनव्यापकयोस्तुमरणयो
जननयोर्वासंकरेप्रथमार्द्धद्वितीयसजातीयसमानगुरुत्वपातेप्रथमेनैवशुद्धिःद्वितीयार्द्धपिडपांसदिनपर्यंतंतादशाहद्वितीययानेन
नैवसंपूर्णकालव्यापिनाव्यतीतेनशुद्धिः अंतिमदिनेतुद्वितीयस्यसजातीयस्यसंपूर्णशौचस्यपतनत् प्राचीप्रकाशंपूर्वसमयेपातेए
तद्दशाहाधिकेनदिनद्वयेनव्यतीतेनशुद्धिः एतत्प्राचीप्रकाशदशायामेवएतादृशस्यद्वितीयस्ययानेएतत्दशाहाधिकेनदिनत्रयेण

पितृ० ४

यतीतेनशुद्धिः रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिरिति वचनात् वृद्धित्तेपि दिनद्वये सजातीयस्य दिनद्वयस्यापि पाते तेनैव व्यतीतेन शुद्धिः
अघवृद्ध्यावशौचं तेपश्चिमे समाप्यपेदिति वचनादिति सर्वत्रसंकरे प्रथमेन द्वितीयेन च निमित्तेन एकमेवाशौचं जन्मनेतेन तदंतदिने द्व्यो
दशाम पिंडदानं क्षौरादिकं च नतु तरदिने द्व्योः शय्यादिदानमाद्यश्राद्धं च अन्यथा दवलिस्याशौचस्य तिरस्तपधस्तत्वेन तध्वंसस्य प्रागेव
सिद्धत्वपातस्याशौचांतकृसंशय्याश्राद्धादि लुप्येतेति मरणेन लघुनापि जननं गुर्वपि साध्यते अथ पिंडदान शिरस्त्वाद्येन पिंडेन प्रेतस्य
क्रियते सदा द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः गलांसभुजवक्षांसि तृतीयेन यथाक्रमात् चतुर्थेन तु पिंडेन नाभिलिंगगु
दानि च जानुजंघे तथा पादौ पंचमेन तु सर्वदा सर्वमर्माणि षष्ठेन सप्तमेन तु नाड्यः दंतलोमाद्यष्टमेन वीर्यं तु नवमेन तु दशमेन तु पूर्ण
त्वं तृप्तता क्षुद्विपर्ययः अत्र क्रियत इति श्रवणात् शिरःकारक एष प्रथमः पिंड इत्यादिर्यद्यपि प्रयोगः संभवति तथापि शिरःपूरक एष प्रथ
मः पिंड एवमादिरेव प्रयोगो दानामपि पिंडानां दृष्टः न स्वधां च प्रयुंजीत प्रेतपिंडे दशाहिके भाषते तत्त्वते पिंडं यश्च दत्तस्य पूरकमिति द्रष्टव्यं
गवचनात् न स्वधामिति प्रयुक्तस्वधाकारस्य निषेधे पिंडदाने सिद्धं प्रेतश्राद्धोक्तं तेमयादीयते तवोपतिष्ठतामिति पैठीनसिसूत्रसिद्धं वाक्य
मत्रापि कर्तव्यं इदं तु पिंडदानं गृहद्वारोपांतभूमौ समूलकुशास्तरणोपरि स्वयं च। यसंपत्नीकर्तव्यं तथा हि ब्रह्मपुराणे मृतासपंभांडमादायनवं स्त्रा
नः स्नुसंयतः लगुडं सर्वदोषघ्नं गृहीत्वा तोयमानयेत् ततश्चोत्तरपूर्वस्यामग्निं प्रज्वालयेद्दिशि तं तुलप्रसृतीनत्र प्रक्षाल्य शुद्धिः प्रवेतस्वयं सपवि

त्रैस्तिलैर्मिश्रं केशकीटविवर्जितं। द्वारोपांते ततः क्षिप्त्वा शुद्धं चागोरसमृत्तिकां। ततः पृष्ठे संस्तरेद्दर्भान् याम्याग्रान् देशसंभवात् ततो वनेजनं
दद्यात् संस्मरेद्गोत्रनामनी तिलसर्पिर्मधुक्षीरैः संचितं तत्रमेव हि दद्यात् प्रेताय पिंडं तु दक्षिणाभिमुखः स्थितः फलमूलगुडक्षीरतिल॰
मिश्रं तु कुत्रचित् अर्घैः पुष्पैस्तथा दीपैस्तोयैश्चापि सुशीतलैः ऊर्णातंतुमयैः शुद्धैर्वासोभिः पिंडमर्चयेत् प्रयाति यावदाकाशं पिंडाद्बाष्पमयी
शिखा तावत् संमुखस्तिष्ठेत् सर्वतोपि क्षिपेत्ततः दिवसे दिवसे देयः पिंड एवं क्रमेण तु एकस्तोयांजलिस्त्वेवं शाखमेकं च दीयते द्वितीये द्वौ तृतीये
त्रीन् चतुर्थे चतुरस्तथा पंचमे पंच षष्ठे षट् सप्तमे सप्त एव हि अष्टमेष्टौ च नवमे तु नवैव दशमे दश येन स्युः पंचपंचाशत्तोयस्यांजलयः क्र
मात् तावंति तोयपात्राणि संयुक्तानि तिलादिभिः अर्घैरिति। इदं च दानं तूष्णीमेव तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव चेति शुनःपुच्छव
नात् एकादश्यादि इदं च पात्रं जलस्योदनं पिंडोपपर्यं विद्वितीये द्वाविंशादिना पिंडस्यैवाधारत्वकथनात् न च द्वितीयदिनादिकं तस्यैः सद्यःशौचस्य
दाशौचपिंडदानस्याप्युपक्रमात् तस्यैव प्रयोगः यजमानः स्नात्वा स्वयं वंशाढ्यहृतजलेकशाखिना समादाय पिंडदानस्थानमागत्य जलेन तत्र
धृत्वा जलांतरेण हस्तौ पादौ प्रक्षाल्याचम्य तंडुलप्रसृतिद्वयं परिमाय तान्मृत्पात्रादौ कृत्वा तेन जलेन त्रिः प्रक्षाल्य नूतनमृण्मयपात्रे पाका
र्थं निधाय तत्र तत्सिद्धिक्षमं गव्यमदुग्धं स्पृश्नीयमसूसंधिनी। विवत्सान्यवत्सादशाहाभ्यंतरप्रसूतानां तद्व्यतिरिक्तं तत्र प्रक्षिप्य पिंडार्थे
स्वयं तत्पचेत् अथ पाके वृत्ते पिंडदानार्थमाचम्यापसव्यं कृत्वा कुशत्रयमादाय पिंडास्तरणार्थं पिंडपिंडिकापार्श्वे दक्षिणाग्रं धृत्वा आचारात्

पित०

पिप्पलपत्रकृतेपुटकेअवनेजनार्थंतत्रपानीयंतिलान् चन्दनंपुष्पंचप्रक्षिप्यमोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मप्रे
तात्रावनेनिक्ष्वत्तेमयादीयतेतवोपतिष्ठतामितिकुशात्रयोपरिपितृतीर्थेनदद्यात् ततःपायसेनतिलघृतमधुगव्ययुतसहितेनपिंडंवर्तुलंनि
५ र्मायमोटकतिलजलसहितमादाय ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतशिरःपूरकएषप्रथमःपिंडस्तेमयादीयतेतवोपतिष्ठतामिति
5 वामेनवाभान्वारब्धदक्षिणहस्तेनकुशात्रयोपरिअवनेजनस्थानेपिंडंदद्यात् ततोवनेजनपात्रमादाय ॐ अद्यामुकगोत्रपितरमुकशर्मप्रे
तअत्रप्रत्यवनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिप्रत्यवनेजनंदद्यात् ततःपिंडोपरिफलानिपुष्पाणिमूलानिदुग्धंदीपान् सुशीतलजला
निताम्बूलंशुल्कोर्णातन्तुकृतवस्त्रंचपञ्चदद्यात् ततस्तिलतोयांजलिमादाय ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतएषतिलतोयांजलिमादाय
ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतएषतिलतोयांजलिस्तेमयादीयतेतवोपतिष्ठतामित्युच्चार्यपिंडोपरिदद्यात् ततस्तिलतोयपात्रंकृत्वा
मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतएततिलतोयपात्रंतेमयादीयतेतवोपतिष्ठतामितिउक्त्वापिंडोपरिक्षिपेत्॥
ततःपिंडदानद्रव्यशिष्टातिरिक्तंतावद्यजमानस्तदभिमुखस्तिष्ठन्ततस्तदुपशमेसतिपिंडादिकंसर्वंतोयेक्षिपेत् ततोहस्तौपादौप्रक्षा
ल्यस्थानमुपलिप्तायांभूमौपुरकेपानीयंगंधमाल्यदीपंचधृत्वामोटकतिलजलान्यादाय आचारात्सायमिसाच्चरंतितत्र ॐ असंस्काराना
विसादिप्रयोगःअन्यसंवसिमानमेव ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतइदंपानीयंतेमयादीयतेतवोपतिष्ठतां ॐ अद्यामुकगोत्रपितर

मुकशर्मप्रेतइदंदीरंतेमयादीयतेतवोपतिषतामिति ततॐ अद्यामुकगोत्रपितरसकशर्मप्रेतइदंमाल्यंतेमयादीयतेतवोपतिष्ठतां तत
ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतएषदीपस्तेमयादीयतेतवोपतिष्ठतां ततॐ अत्रस्नाहिइन्मुत्काजलपुटकंमुञ्जीकुर्यात् तथैव
ॐ इदंपिबेतिक्षीरपुटक इदंपरिधेहीतिमामाल्यपुटकं ॐ अनेनपश्यसेतिदीपंस्थापयेत् एवमेवद्वितीयादिदिनेपिंडदानमपि तद्यथा ॐ
अद्यामुकगोत्रपितरमुकशर्मप्रेतकर्णाक्षिनासिकापूरकएषद्वितीयः पिंडस्तेमयादीयतेतवोपतिष्ठतां तथा ॐ अद्यामुकगोत्रपितरमु
कशर्मप्रेतगलांसभुजवक्षः पूरकएषतृतीयः पिंडस्तेमयादीयतेतवोपतिष्ठतां तथा ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतनाभिलिंगगुद
पूरकएषचतुर्थः पिंडस्तेमयादीयतेतवोपतिष्ठतां तथा ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतजानुजंघापादपूरकएषपंचमः पिंडस्तेमया
दीयतेतवोपतिष्ठतां तथा ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतसर्वमर्मपूरकएषषष्ठः पिंडस्तेमयादीयतेतवोपतिष्ठतां तथा ॐ अद्या
मुकगोत्रपितरमुकशर्मप्रेतसर्वनाडीपूरकएषसप्तमः पिंडस्तेमयादीयतेतवोपतिष्ठतां तथा ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतदंतलो
मादिपूरकएषोऽष्टमः पिंडस्तेमयादीयतेतवोपतिष्ठतां ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतवीर्यपूरकएषनवमः पिंडस्तेमयादीयतेतवोप
तिष्ठतां तथा ॐ अद्यामुकगोत्रपितरमुकशर्मप्रेतपूर्णतात्वततासुद्धिपर्ययपूरकएषदशमः पिंडस्तेमयादीयतेतवोपतिष्ठतां द्वितीयपिं
डदानेएतौद्वौतिलतोयांजलीतेमयादीयेतेतवोपतिष्ठेतां इत्यादिकंतावद्यावत्तत्वायुक्तंनहि द्विहस्तस्यपुरुषस्यद्वावंजलीएकदासंभवतः तस्मा

देत्ताविस्युक्तं ह्ययोरंजल्योः क्रमिकयोर्युगपत्प्रसक्तविषयत्वात् अंजलीइतिचायुक्तं युक्तपाणिद्वयस्थितजलावयविद्वयस्यैक
त्वासंभवात् सकृतकृतेन त्यागवाक्येन भविष्यद्‌जलेरलभ्या। एकस्य त्यागासंभवात् लब्धात्मकं हिस्वंत्यज्यतेनत्वलब्धात्मकं स्वत्वा
नास्पदं वाननुमंत्रशब्दस्यतर्पणे यथांजलित्रयस्ययुगपत्त्यागस्तथात्रापिस्यादितिचेत् नपक्षसमत्वात् अतएवतत्रवृद्धमात्रो याध्या
यः प्रसंजलित्यागवाक्यमाहुः ननुभविष्यंतीनां समिधामधिवासमरात्रौ त्यागवत् अत्रापिभविष्यद्‌जल्योस्त्यागोस्त्वितिचेत् त
पक्षसमत्वात् तस्माद्युक्तदोषैः समुदितत्यागासंभवादेकदाद्दानस्यजंतेकिंतुप्रत्येकं त्यक्ता इत्यभवंतीति नचैवमाचारविरोधः शास्त्र
विरोधेनाचारस्यदौर्बल्येन तद्विरोधस्याकिंचित्करत्वादिति अथपक्षासुश्चिसेषु पिंडदानानंतरं तथात्यागपंसंध्योनंरयानीयस्तीरमात्म
दीपाद्याः पापसासंभवेश्रुनः पृष्ठः फलमूलैश्चपायसाशाकेनच गडेनच तथाश्रालिनासक्तुभिर्वापिशाकैरप्यपनिर्वपेत् अस्या
र्थः फलैः पनसादिकोद्यैः मूलैः मूलकादिभिः प्रपयसापिंडीकृतदोधेन शाकेनसाधितवास्तूकादिना गुडेनद्रढीभूतगुडेनशालिनाशालितं
डुलचूर्णैः पिंडीकृतैः सक्तुभिर्भ्रष्टयवचूर्णैः पिंडीकृतैः अथास्थिसंचयः तत्रविष्णुः चतुर्थदिवसेऽस्थिसंचयनं तेषांचगंगांभसिप्रक्षेपः
यावदस्थिमनुष्यस्यगंगातोयेषुतिष्ठति तावद्वर्षसहस्राणि स्वर्गलोकेमहीयते यावदितियावत्संख्यकमित्यर्थः चतुर्थदिवसइतिब्रा
ह्मणपरं त्रिधाविभक्तस्याशौचस्यप्रथमभागानंतरमस्थिसंचयनविधानात् तदुक्तं असंचयपद्दसुयक्रम्यब्रह्मपुराणे चतुर्थेब्राह्मणानां

तुपंचमेहनिभूतां नवमेवैश्यजातीनांशूद्राणांद्वादशमासेकर्त्तव्यंतुनरैः श्राद्धंदेशाकालविरोधतः नवमइतिषष्ठाहाकरणपक्षेद्वादशमा
सेएकादशेकर्त्तव्यमित्याद्येववाक्यंतन्निमित्तकश्राद्धकरणेमानं यत्तुसंचयनंचतुर्थ्यामयुग्मान्ब्राह्मणान्भोजयित्वाइतिदर्शनाद
स्थिसंचयनश्राद्धांगकंतत्साग्निपरं अस्थिसंचयनादर्वागाहिताग्नेर्द्विजोत्तमः अयुग्मान्भोजयेद्विप्रान्तन्नवश्राद्धमुच्यतेइतिय
मवचनात् निरग्नेस्तुतच्छ्राद्धंनैमित्तिकंदन्द्वाद्युवंधनवत् तदप्यनावश्यकंकर्त्तव्यंतुनरैःश्राद्धंदेशाकालाविरोधतइतिवचनात् यत्तुप्र
थमेन्हितृतीयेवेतिसंवर्त्तेनोक्तंतच्च अपरेघुस्तृतीयेवेतिछन्दोगपरिशिष्टउक्तंतच्चतुर्थदिनपर्यंतंचितास्थानामस्थ्नांरक्षणाशक्तौ
बोद्धव्यं अपरेघुरितिमहाशौचपरमित्यर्थःपञ्चसप्तमेनवमेतथेतिब्राह्मणास्थिसंचयनंसंवर्त्तेनोक्तंतच्चतुर्थदिनेराजदैवकरोषेणत
दसंभवेबोद्धव्यंएवंचैतावद्दिनानंतरंनास्थ्नांसंचयोऽनभिधानात् ब्रह्मपुराणेस्नात्वात्रिरात्रंकुर्वंतिप्रेतायोदकतर्पणं श्मशानेदेवताया
गंचतुर्थदिवसेततःभवंतिपूजितायस्मात्तत्रसाःशंकरादयःस्नातैःसुधौतवस्त्रैश्चश्मशानस्यसमीपगैःस्वजातिविहितैर्द्रव्यैर्यथाश
क्तिसमाहृतैः मरामपेषवभोऽउषुकुंऽषुचरुकेषुच सुपर्णैर्भक्ष्यभोज्यैश्चपापसैःपानकैस्तथा फलैर्मूलैर्वनोद्भवैश्चपूज्याःक्रव्यादिदेवताःकै
श्चिद्दध्यंमत्तव्यंकैश्चित्पुष्पंचशोभनं। धूपोदीपस्तथामाल्यंकैश्चिद्देयंत्वरान्वितैः तत्रपात्राणिपूर्णानिश्मशानाग्नेःसमीपतःकैश्चिद्दा
निसर्वाणियानीपानीयान्यस्तानिचनिवेदयेतिवक्तव्यंतैः वैरनहंकृतैःनमःक्रव्यादिमुख्येभ्योदेवेभ्यइतिसर्वदायेस्मिन्श्मशानेदेवाःसुभ

गवंतः सनातनाः तेस्मत्सकाशाद्दत्तं तु बलिमष्टांगमस्त्वयं प्रेतस्यास्य शुभाल्लोकान् प्रयच्छंतु शाश्वतान् अस्माकमायुरारोग्यं
सुखं च ददतां वरं एवं कृत्वा बलीन् समाहितैः ततोयक्षांगवृक्षेभ्यः शाखामाहृत्य वाग्यतः अपसव्यं क्रमाद्दत्वा कृत्वा कश्चित्सगोत्र
जः प्रेतस्यास्थीनि गृह्णाति प्रधानांगोद्भवानि च पंचगव्येन सुस्नाप्य सौमवस्त्रेणवेष्टयेत् प्रक्षिप्य मृण्मये भांडे नवे साच्छादने शुभे अर
ण्ये वृक्षमूले वा शुद्धे संस्थापयेत् सपि तथाचं छंदोगपरिशिष्टे कात्यायनः शमीपलाशशाखाभ्यामुद्धृत्योद्धृत्य भस्मनः आज्येनाभ्यस्य
गंधेन क्षेपे चंदनवारिणामृतगात्रे संपुटे कृत्वा सूत्रेण परिवेष्ट्य च अग्निं शिन्यां शुचौ भूमौ निखने दक्षिणामुखः पूरपितावठं षडंकपिंडोवा
लसंयुक्तं दत्वोपरि समं शेषं कुर्यात्सु एषाहकर्मणा गृहीत्वास्थीनि तद्भस्म नीत्वा तोये विनिक्षिपेत् ततः संमार्जनं भूमेः कर्त्तव्यं गोमयां
बुभिः पूतान्वपुष्पपाद्यैश्च बलिभिः पूर्ववत् क्रमात् भूमेराच्छादनार्थं वृक्षः पुष्कलको पिवायद्भ्को मपिकर्त्तव्यः तत्र सर्वैर्विधानतः मृ
एमयेष्वितिमृत्कुंडेषु अष्टांगोष्टो बलयः करणीयाः भक्ष्यभोज्यपायसपानकमेकमंगं फलमन्नं द्वितीयं अर्घस्तृतीयं गंधश्चतुर्थं पु
ष्पमाला पंचमं धूपः षष्ठं दीपः सप्तमं तं दूलादिपूर्णपात्रमष्टमं एतानि अष्टौ कुंडानि अत्र चत्वारि कुंडानि चितापार्श्वे चतुर्षु द्वारे
षु प्रयमं धर्त्तव्यानि तु चत्वारि एकैकैकोद्दिष्टापतमानः शुचिरावांतः कृतापसव्यः ॐ नमः क्रव्यादमुखेभ्यो देवेभ्य इति सर्वत्र येस्मिन् श्मशा
ने देवाः सु भगवतः सनातनाः तेस्मत्सकाशाद्दत्तं तु बलिमष्टांगमत्त्वयं प्रेतस्यास्य शुभाल्लोकान् प्रयच्छंतु शाश्वतान् अस्माकमायुरा

रोग्यं सुखं च ददतां वरं एषोऽष्टांगबलिः ॐ शंकरादिदेवताभ्यो नमः इति तिलपुष्पैर्दद्यात् प्रथमं बलिमुत्तरद्वारि द्वितीयं पूर्वद्वारि तृती
यं दक्षिणद्वारि चतुर्थं पश्चिमद्वारि दद्यात् ततः क्षीरं दक्षिणहस्तेनादाय ॐ शंकरादिदेवताः स्वस्थानं गच्छंतु इति मनसा पठित्वा क्षी
रं बलेरुपरि विक्षिपेत् एवं पूर्वादिबलिषु कुर्यात् ततश्चितायाः प्रतिसमीपं गत्वा अपसव्यं कृत्वा शमीपलाशशाखाभ्यांमादवृतमांगी
स्थि समादाय पत्रपुटके कृत्वा पंचगव्येनाऽसिंच्य आज्येन गव्येन गंधेन वाऽभ्युक्ष्य गंधवारिणा सिक्त्वा होमवस्त्रे एवेष्ट्य नूतनमृण्मभांडे
शनैर्धारयेत् एवं सर्वेषामेव मस्तकहृदयजठरकटिचरणाद्यस्थ्नां संचयपद्धारणादिकं कर्तव्यं ततो भांडमखंडवस्त्रादिना संवेष्ट्य क्वचिद्दरणेव
क्षमूले शुद्धनदीतीरादौ वा धारयेत् चितां भूमिं च कुद्दालादिना खनित्वा भवस्मादि सर्वं तोये प्रक्षिपेत् ततो भूमिं गोमयोदकेनोपलिप्य पूर्व
वत् बलिचतुष्टयं दत्त्वा तत्स्थानं परिसज्य तत्र स्थाने देवकुलादिकं कारयेत् अथास्थिप्रक्षेपः तत्र ब्रह्मपुराणे नरास्थि शनकैर्नीलाकरां वि
ज्ञान्ह्वीजले कश्चित्क्षिपति सत्पुत्रो दौहित्रो वा सहोदरः तथा अस्थीनि मातापितृपूर्वतानां नयं गंगामपि पेकरा चित् सम्भिक्तिकस्या
पिदयाभिभूतास्तेषां तु तीर्थानि फलमप्रदानि कुलद्वयं वाप्यथवर्जपिता माता पित्रोर्नरस भूम्यां स्थितं च अस्थीनि चीम्नसन मनु वहेच्च भा
ग्यसंपल्लभते दुःकृतं च भागीरथी पत्रगतापतार्यकुलेनरः क्वापि परावि पक्षाः तदानदानत्र तथा च भक्तभावेन वास्थीनि विनिःक्षिपेच्च रता
लानंतः पंचगव्येन सिक्त्वा हिरण्यमधुआज्यतिलैर्युक्तपोऽग्नं ततस्त्वा मृत्तपिंडपुटे निधाय पश्यन् दिशं प्रेतगतां पथ गुष्ठैनमोऽस्तु धर्माय जलं प्रविश्य व

पित०

८

४

स्त्वसमे प्रीतः स्त्विति क्षिपेत् एवं कृते प्रेतपुरे स्थितमेवेह्यस्य सूर्यसदृक्षिणं विप्रमुखायदद्यात् एवं कृते प्रेतपुरे स्थितस्य स्वर्गगतिः स्यात्तमहे

न्द्रतुल्यात्तया मातुः कुलं पितृकुलं वर्जयित्वा नराधमः अस्थीन्यस्य कुले यस्यानिनीतान्यानुरूपं चरेत् कश्चिदिति तेनास्थिप्रक्षेपे पुत्रस्यैव

हि प्रक्षेपस्यानुवंशस्याप्यधिकारः उक्तं सम्पत्तिकस्येति भक्तस्याप्यवंशस्यापि फलं यान्यस्थिवहनं विहितं यत्तु मातृवंशपितृवंशावभ

वातिरिक्तस्य अस्थिसञ्चयने यत्तु दूषणमुक्तं तद्भागिरिभिन्नेतरपरेतरस्थं भागीरथ्यामितिप्रत्नप्रयागादौ भागीरथ्यास्तितस्यां भागीरथ्यां

अस्थिप्रक्षेपे केवलभागीरथ्यपेक्षया फलभूमा गंगायामस्थिप्रक्षेपमात्रस्यैव महत्तुतुल्यगतिकत्वाभिधानात् प्रक्षेपप्रकारमाह ०

स्नात्वेति अस्थीनि क्षुरस्यानाचीत्वा नीरे धृत्वा स्नानं कृत्वा पञ्चगव्येनास्थीनि प्रोक्ष्य हिरण्यमध्वाज्यतिलैः संयोज्य मृत्पुटके निधाय दक्षिणां

स्तेन ततः पुटकं निधाय नमोस्तु धर्मायेत्युक्त्वा जलं प्रविश्य दक्षिणां दिशं पश्यन्नेव ॐ समे प्रीतः स्त्वित्युक्त्वास्थीनि गंगायां प्रक्षिपेत् ततो मज्जनं

कृत्वा सूर्यं निरीक्ष्य कितिवत् पणपुराणान्दिकं कपर्दिकसंख्या रगादिकं ब्राह्मणाय भूरि दक्षिणां तेन दद्यात् अथाशौचान्तदिनकृत्यं तत्र ब्रह्मपु

राणे यस्य यस्य तु वर्णस्य यद्यत्स्यात्पश्चिमं त्वहः अन्नवस्त्रविशुद्धिं च गृहस्य शुद्धिं करोत्यपि समाप्य दशमं पिण्डं यथाशास्त्रमुदाहृतं ग्रामाद्

हिस्ततो गत्वा प्रेतस्पृष्टे तु वाससी अन्त्यानामाश्रितानां च त्यजेत् स्नानं करोत्यपि श्मश्रुलोमनखानां च यत्स्यात्तज्ज्ञत्यपि गौरसर्षपक

ल्केन तिलकल्केन संयुतः शिरःस्नातुं ततः कृत्वा तोयेनाचम्य वाग्यतः वासोयुगेन वस्त्रेण शुक्लमव्रणं शुद्धमेव च गृहीत्वा गां सुवर्णं च मंगलानि

शुभानि च स्पृष्ट्वा संकीर्तनीपित्वाव पश्चाच्छुद्धो भवेन्नरः पश्चिमं स्वाशौचांतिमदिवसं गृहस्य शुद्धिः पाकभांडत्यागः ततः स्थानपरिस्कारादिना व॰
स्त्रशुद्धिः यत् अशौचवस्त्रायां परिहितं तत्तावद्दशामपिंडदानानंतरं रजकस्य प्रक्षालनाय देयं यत्तु प्रेतस्य वहनदहनकाले परिहितं॰
मासीत् तद्घाग्निता यनापिताय देये वस्त्रांतरं परिधाय मज्जनं कृत्वा सौरनखादिकर्म कारयेत् ततो गोरसर्षपतिलकल्काभ्यां सशि
रः स्नात्वा नवं वासो पुरंगं शुक्लमग्निभूषकं अघ्नुपहतं परिधायाचम्य मौनी तारीतः अश्वारिष्टगोहिरण्यादीनालभ्य प्रवेशनं अश्मा
पाषाणः अरिष्टो निंबः गोः प्रसिद्धैव तथा हिरण्यमादिपद्याद्यं मंगल्यं दधिदूर्वापुष्पाक्षतादिग्रहितं एतेषामालंभः स्पर्शः चातुर्वर्ण्य
साधारणः विशिष्य तु ब्राह्मणेन जलं स्पृष्ट्वा क्षत्रियेण वाहनायुधादि वैश्येन प्रतोद्योक्त्रादि स्प्रष्टव्यं शूद्रेण यष्टिः सव्ये सर्पः विप्रः शुद्ध्यत्यपः
स्पृष्ट्वा क्षत्रियो वाहनायुधं वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः इति मनुवचनात् वपनेत्यापस्तंबः पौर्णमास्यां वै मरणे मातरि पि
तर्याचार्ये स्नानं तावंतं कालमनुभाविनां वपनं वापरिवायनं न समावर्तनाव पेरन् अस्य च वीहराद्दिसेके अथापि ब्राह्मणैरिक्तो वा एषो न पिहि
नस्तस्यैव तदपिधानं पच्छिधेति मातरीति मातरि पितरि आचार्ये वै मरणे विरमणसंबंधिनि मरणभातिसति पुत्रस्य शिष्यस्य च तावंतं
कालं स्पर्शाहं व्याप्य मज्जनमात्रं अशौचांते शिरोवपनं च एवं पौर्णमास्यामपि गृहस्थानां शिरोवपनमिसर्पः अनुभाविनामिति अनु
पश्चाद्भवंतीत्यनुभाविनः कनिष्ठाः एते तु कनिष्ठाः सपिंडा एव दशाहमन्मरणं पालयेति श्रवणात् समानोदकानां तु त्र्यहं पूतविचारो चाप्यपगमः

पित॰

६

१

नसमावर्तनादिति एके त्वाचार्या मा । सते समावृत्ताः कृतसमावर्तनाः पुरुषाः मातापित्राचार्यमरणे वपिन शिरोवपनं कारयेयुः अ
नेहेतुः एष ब्राह्मणः शिखारूपाच्छादनरहितः सन् रिक्तो भवति तस्य ब्राह्मणस्य पञ्चशिखास्थितेत्वाच्छादनमिति तेन केशानां वपनं मातृमे
रणे पितृमरणे आचार्यमरणे च गृहस्थानां नास्ति सेके आचार्या आहुः तत् आचार्याः वीहारे वपनं प्रतिप्रसुवन्ते अन्यत्र वीहारादिति
विहारो दर्शपूर्णमासं गयाग विशेषः तदिदं मेतेषां मतमुपयुक्तं आग्न्याधाने सोमपाने कार्यं दीक्षेषणे तीर्थयात्रायां शिरोवपनस्य
सर्वासिद्धत्वादिति । अथावसरतआधेयाद्धंमस्ते । तमेनतपूर्वकेस्य वर्षोत्सर्गस्य पारस्करो परिषधर्मातिदेशानपात् आरो पारस्करो
क्ताने वधर्मनिग्राहपितुं ततस्तनमुपन्यस्यामः तथाहि अथातो गृह्यस्थालीपाकानां कर्म परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्नि
मुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्य परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत्प्रोक्ष्या ति
रुप्याज्यमधिश्रित्य पर्यग्निं कुर्यात् स्रुवं प्रतप्य संमृज्याभ्युक्ष्य पुनः । प्रतप्य दक्षिणतो निदध्यादाज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्व
वदुपयमनकुशानादाय समिधोऽभ्याधाय पर्युक्ष्य जुहुयादेष एव विधिर्यत्र क्वचिद्धोमः । अथ श्रौतकर्मविधानानंतरं यतो हेतोः श्रौता ।
निस्मार्त्तानि विधेयानि अतो हेतोर्गृह्ये आवसथ्ये अग्नौ ये स्थालीपाकास्तेषां कर्मानुष्ठाने व्याख्यास्यत इति शेषः परिसमुह्य त्रिभिर्दर्भैः
वै पांशूनपसार्य उपलिप्य गोमयोदकाभ्यां एतदुभयमप्यदक्षिणसंस्थं उल्लिख्य खादिरेण हस्तमात्रेण स्फ्येन कृतेनास्पेन मानमानउद्य

६

संस्थास्थंडिलपरिमाणस्तिस्रो रेखाः कृत्वा उद्धृत्यानामिकांगुष्ठाभ्यां यथोल्लिखितानां रेखाणां पांसुमुद्धृत्याभ्युक्ष्याग्निं निक्षिप्य अ
ग्निमुपसमाधायाग्नौ तस्मात्तिलोकितं वाग्निमात्माभिमुखं संस्थापयित्वा दक्षिणतो ब्रह्मासनमास्तीर्य दक्षिणतः होतुर्दक्षिणतो हुर्दक्षिण
स्य ग्रहस्यं ब्रह्मणः आसनं प्रागग्रैः कुशैरास्तीर्य तत्र ब्रह्माणं तेन वृतमुपवेश्य प्रणीयचतुरंगुलविस्तारं चतुरंगुलखातं पात्रं सव्यहस्ते
न दक्षिणहस्तोद्धृतपात्रस्योदकेन पूरयित्वा परिस्तीर्य बर्हिर्मुष्टिमादाय प्रागग्रैर्बर्हिर्भिरीशानात् सोम्यान्तमग्नेः परिस्तरणं कृत्वा अ
र्थवदासाद्य पात्राण्यिय दर्भैः अर्थैः प्रयोजनं तावतोर्थवतः पदार्थानुदगग्रैरुत्तरतः प्रणीतापर्यन्तमासाद्य तेषु यथापवित्रच्छेदनार्थं दर्भास्त्र
यः पवित्रार्थमनन्तर्गर्भितसाग्रकुशपत्रद्वयं प्रोक्षणीपात्रं द्वादशांगुलदीर्घमाज्यस्थाली तैजसी मृण्मयी वा द्वादशांगुलवितता प्रादेशो
च्चा तथा चरुस्थाली नातिरहन्मुखी संमार्जनार्थं कुशास्त्रयः उपयमनकुशास्त्रयः समिधस्तिस्रः पालाश्यः प्रादेशमात्र्यः स्रुवः खा
दिरो हस्तमात्रो अंगुष्ठमात्रखातः ततः आज्यं मध्यं चरुवर्थं व्रीहितण्डुलाः षट्पंचाशदुत्तरमुष्टिशतद्वयपरिमितं तंडुलाधनं पूर्णपात्रं दक्षिणा
वरस्थितापनीयो गौः यथाशक्ति हिरण्यं वा येति ते कृत्वा त्रिभिः कुशैः प्रादेशमात्रं कुशपवित्रं छित्वा प्रोक्षणीः संस्कृत्य प्रोक्षणीपात्रं प्रणीता
संनिधौ निधाय तत्र पात्रान्तरेण हस्तेन वा प्रणीतोदकमासिच्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षण्यां निधाय दक्षिणहस्तेन प्रोक्षणीपा
त्रमुत्थाप्य सव्ये कृत्वा तदुदकं दक्षिणहस्तेनादाय अर्थवत् प्रोक्ष्य अर्थवदिति प्रयोजनवन्तीत्याज्यस्थाल्यादीनि पूर्णपात्रपर्यन्तानि प्रोक्षण

पि.ह.०

न्निरासादनक्रमेणैकैकशः प्रोक्ष्य प्रार्त्तिक्रमानुरोधात् निरुप्याज्यं आसादितमाज्यस्थाल्यां यस्मात्तेनेर्निहितायां प्रक्षिप्य चरुस्थाल्यां
प्रणीतोदकमासिच्यासादितांस्तण्डुलांस्तत्र प्रक्षिप्याग्निसतत्राधिज्यं ब्रह्मा अधिश्रयति तदुत्तरः स्वयं चरुमेवं युगपत्समारोप्य पर्यग्निं कुर्यात् ज्व
१० लदुल्मुकं प्रदक्षिणमाज्यचर्वोः समंताद्भ्रामयेत स्रुवं प्रतप्य दक्षिणहस्तेन स्रुवमादाय वामे चाधोमुखमग्रे तापयित्वा सव्यपाणौ
कृत्वा दक्षिणहस्तेन संमार्जनकुशाग्रैरंतरतो मूलैर्बाह्यतोऽग्रैरंतरतो मूलतोम पर्यंतं संशोध्याभ्युक्ष्य प्रणीतोदकेनासिच्य पुनः प्रतप्य दक्षिण
तो निदध्यात् आज्यमुद्वास्योत्थाप्य चरोः पूर्वेण नीत्वाग्नेरुत्तरतः स्थापयित्वा चरुमुत्थाप्याज्यपश्चिमेन नीत्वाज्यस्योत्तरतो निदध्या
त् तत आज्यमग्नेः पश्चिमादानीय चरुं चान्यस्योत्तरतो निधाय पूर्ववत् पवित्राभ्यामुत्पूय अवेक्ष्य आलोक्य चाज्यं प्रोक्षणीश्च पूर्ववत्पवि
त्राभ्यामुत्पूय अवेक्ष्य आलोक्य चाज्यं प्रोक्षणीश्च पूर्ववत्पवित्राभ्यामुत्पूयोपयमनकुशानादाय दक्षिणपाणिना गृहीत्वा सव्ये निधाय स
मिधोऽभ्याधायोत्तिष्ठन्नग्नौ समिधं तूष्णीं प्रक्षिप्य पर्युक्ष्य प्रोक्षणीशेषेणोदकेन सव्येन चुलुकगृहीतेन सपवित्रेणाग्निमीशानादितः परि
षिच्य जुहुयात् आघारादीनितिशेषः एष एव विधिर्यत्र क्वचिद्धोमे द्रष्टव्यः परिसमूहनादि पर्युक्षणपर्यंतो विधिरेवं न मंत्राः पत्रक्वचनलौकिके
स्मार्तेनाग्नौ होमस्तत्रैव द्रष्टव्यः तद्यथा अन्वारब्ध आघाराज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यं स्विष्टकृच्चैतन्नित्यं सर्वत्र आसा
र्थः ब्रह्मणा दक्षिणबाहुनास्पृष्टे वा होमे अन्वारब्धे होतरि आघारसंज्ञके आहुती यथा मनसा ॐ प्रजापतये स्वाहा इदं प्रजापतये ॐ इंद्राय स्वा

हा इदमिन्द्राय इत्याघारौ आज्यभागौ होमो यथा ॐ अग्नये स्वाहा इदमग्नये ॐ सोमाय स्वाहा इदं सोमाय महाव्याहृतयो भूराद्यास्ति
स्रः यथा ॐ भूः स्वाहा इदमग्नये इदं भूरिति वा ॐ भुवः स्वाहा इदं वायवे इदं भुवरिति वा ॐ स्वः स्वाहा इदं सूर्याय इदं स्वर्पाय इदं स्वरिति वा स
र्वप्रायश्चित्तसंज्ञकाः पञ्चाहुतयः तथा ॐ त्वन्नो अग्ने ॐ स त्वन्नो अग्ने ॐ येतेशतं ॐ उदुत्तमं मिति पंचभिर्मन्त्रैः पञ्चाहुतयः प्राजापत्यं
प्रजापतिदेवताको होमः यथा ॐ प्रजापतये स्वाहा इदं प्रजापतये स्विष्टकृच्चेति स्विष्टकृद्धोमः ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्ट
कृते एतत्त्रितयं एतदाघारादि स्विष्टकृदवसानं सर्वत्र सर्वेषु विहितेषु होमेषु स्विष्टकृद्धोमस्य हविर्विशेषे एककर्मविशेषस्यानन्तरमाह प्रा
ङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविरिति महाव्याहृतिभ्यः पूर्वं स्विष्टकृद्धोमो भवति यदाज्यादन्यच्चरुप्रभृति हविर्भवति केवला
ज्यभागे तु सर्वाहुतिशेषे भवतीत्यर्थः प्रसंगाद्धोमान्तरस्यापि विधिरुच्यते तत्र देवीपुराणे होमोऽत्र हि पूजायां शतमष्टाधिकं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते इ पंचहोमसंख्याशतमनुसारेण वै कालिकी द्रष्टव्या छन्दोगपरिशिष्टे आज्यं द्रव्यमनादेशे जु
होतिषु विधीयते मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः अनादेशे अविधाने होमद्रव्यस्येति शेषः मन्त्रस्य देवतायाश्च सनादेशे इदमनुष्
ज्यते मन्त्रस्यानादेशे प्रजापतिदेवताको महाव्याहृतिमन्त्रः सर्व समस्तव्याहृतिरूपात्मकः देवतायाश्चानादेशे प्रजापतिर्देवता इदमेकस्यैव प्र
जापतिरित्यस्यैवार्थ इति कल्पतरुकारादयः होमपात्रमनादेशे द्रवद्रव्ये स्रुवः स्मृतः पाणिनैवेतरस्मिंश्च स्वल्पवाचीत्रनहूयते अनादेशे होमपात्र

सेतिशेषः इतरस्मिन्द्रवस्यैतरहोमेऽभयत्रैवानुपदेशोऽस्कवाहोमोनकार्यःस्रुवोजुहुरितिसमाख्यावलाज्ज्वलात्अपिचैकसिकहोमसा
धनत्वशंकानिरासार्थंस्कवानरूपतसुक्तंखादिरोवाथपालाशोद्विवितस्तिःस्रुवःस्मृतःस्रुग्बाहुमात्रीविज्ञेयावृत्तस्तस्यग्रहस्तयोः मग्र
११ हतेस्मिन्निनितिव्यसस्यामग्रहोरुःस्रुवस्तुवस्तुचोर्वर्तुलोविज्ञेयःप्रादेशद्वयमिध्मस्यप्रमाणंपरिकीर्त्तितं एवंविधाःस्युरेवेहसमिधःसर्वकर्म
सुसमिद्दार्षिषुहोमेषुमंत्रैस्वतवर्जिताःपुरस्ताद्वोपविष्टाद्वइंधनार्थंसमिन्स्वेत् नांगुष्टादधिकाग्राह्यासमित्स्थूलतमाक्वचित् नविशु
ष्कत्वचावैवनसकीठानपाठिताप्रादेशान्नाधिकानोनातथानस्यात्द्विशाखिका नसपर्णात्निर्वार्याहोमेषुचविजानता विशाखिका।विवि
धशाखायुक्ता निर्वीर्यानिस्सारामरीचिःप्रागग्राःसमिधोदेयाःपुष्टार्थंहिविजानता सांस।वैषुसशल्कादीर्घविपरीताजिघांसतःविशीर्णावि
दलाहस्वावक्रासखुचिणकृशाःदीर्घाःस्थूलाःघुणोपजुष्टाःकर्मसिद्धिविनाशिकाःसशल्काःसत्वचःसमिदधिकारे ब्रह्मपुराणे पलाशाश्वत्थन्य
ग्रोधप्लक्षवैकंकतोद्भवः अश्वत्थोडुंबरोविल्वश्चन्दनःशरलस्तथा शालश्चदेवदारुश्चखादिरश्चेतियतिकाः अश्वत्थन्यग्रोधः अश्वत्थस्यसंपृक्तोवरः
अश्वत्थस्यपुनरुत्पादनमित्येके पुनरश्वत्थोपादानपंक्षोपयुक्तेध्याहवयश्चस्यसंवंधार्थमित्यन्ये वैकंकतःस्रुवान्वृत्तोरुषकंठापीत्यपक्रः
शोनप्रसिद्धःशंस्त्वःनाशोक्षितमिंधनमग्नावादध्यात् विष्णुधर्मे मंत्रेणोंकारंघृतेनस्वाहांतेनविचक्षणःस्वाहावसानेजुहुयाध्यायन्वैमंत्रदे
वतां छन्दोगपरिशिष्टेकात्यायनमः यावापाहुतिर्द्वादशापर्वपूरिकास्रुवादिनाचेस्कवमात्रपूरिकादैवेनतीर्थेनविहूयतेहविःसंगारिलिसर्वि

षितञ्च पावके पोनर्विषिंजुहोत्यग्नौ। मन्त्रार्विषिञ्चभानवः मंदाग्निरामयावीव दरिद्रश्चोपजीयते तस्मात्सामिद्धहोतव्यंनासमिद्धे कदाचन
आरोग्यमिच्छतायुश्च श्रियमात्यंतिकींतथा जुहुयं श्च हुतेचैव पाणिशूर्पस्फ्यदारुभिः नकुर्यादग्निधमनं कुर्यान्निव्यजनादिना मुखेनैव
धमेदग्निमुखाद्येषोऽध्यजायत नाग्निंमुखेनेति यद्योक्तं लौकिके पोतर्पतीति जुहुयन्न होतमिच्छन्। अथवृषोत्सर्गप्रकृतिभूतगोयज्ञप्रकृति
त्वेनशूलगवः सविकृतिमस्तूयते तत्रपारस्करः शूलगवः स्वर्ग्यः पशव्यः पुत्र्यो धन्यो यशस्य आयुष्य औपासनमरणिं गत्वा वितानं सा
धयित्वारौद्रं पशुमालभेत् सांड गोवंशिवा दुर्ग्राम्यपयित्वा स्थालीपाकमवदानानि रुद्राय वपामंतरिक्षाय वपांस्थालीपाकं मिश्रमेवदा
नानिजुहोत्यग्नये रुद्राय शर्वाय पशुपतय उग्रायाशनये भवाय महादेवायेशानायेति वनस्पतिः स्विष्टकृदंते दिग्व्याघारणं एतेनैवगोयज्ञो
व्याख्यातो पायसेनानतुल्लुप्तः तस्य तुल्यवयाः दक्षिणा। अथवृषोत्सर्गो गोयज्ञेन व्याख्यातः कार्त्तिक्यां पौर्णमास्यां रेवत्यां वाश्वयुजस्य म
ध्ये गवां सुसमिद्धमग्निं मथित्वाज्यं संस्कृत्येहरतिरिति षड् जुहोति घृतिमं च पूषागा अन्वेतनः पूषारक्षत्वर्वतः पूषा वाजं सनोतु नः इति पौष्णस्य
जुहोति रुद्रान् जपित्वैकवर्णं द्विवर्णं वा यो वा यूथं छादयति यं वा यूथं छादयेत् रोहितो वैव स्यात् सर्वाङ्गैरुपेतो जीववत्साया पयस्विन्याः पुत्रो यू
थे च रूपस्वित्तमः स्यात्तमलंकृत्य यूथे मुख्याश्चतस्रो वत्सतर्यस्ता अलंकृत्य एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथ प्रियेण। मानः साप्त जनुषा
सुभगा रायस्पोषेण समिषा मदेमेत्येतयैव वत्सान्जे मध्यस्थमभिमंत्रयेत् मयोभूरित्यनुवाकशेषेण शूलगवस्तावत् स्वर्गाय पशवे पुत्राय ध

पि॰न॰ नायपशवो आयुषे हितः तेन तावत्सकलकर्त्रर्थः तत्र रुद्रदेवताकः पशुरालम्भः स च संडः छागो गौर्वा तिदानीं प्रयोगमाह रौद्रस्य पशोर्व
पां अपपिताल्ल् अयवपां जुहोति अंतरिक्षाय वपा ततः स्थालीपाकमिश्राणि मांसावदानानि जुहोति अग्नये रुद्राय शर्वाय पशुपतये उग्राय
१२ शनये भवाय महादेवाय ईशानायेति वनस्पतये स्विष्टकृते सर्वं तेन शूलगवेन गोयज्ञो व्याख्यातः तथा च शूलगवस्यैव देवभागो यज्ञो
12 पि द्युविशेषमाह पापस्येति तथा चात्र पशुमांसस्य न पापसंदर्शनं यच्छेषं समानं दक्षिणान्तं गोः अयेति वृषोत्सर्गस्त्वगोयज्ञेन व्याख्यातः
तथा च वृषोत्सर्गो ऽपि यज्ञवत् अग्न्यादयो न वह्निदेवताः पापसंभ्रूयं दक्षिणान्तं वक्ष्यति तेन शूलगवः पशुयागत्वेनाग्नीषोमीयधर्मग्राही
गोयज्ञः तद्धर्मग्राही वृषोत्सर्गः तेन स्मार्तेऽपि वृषोत्सर्गः श्रौतेन शूलगवप्रकृतिकगोयज्ञप्रकृतिकत्वात् अग्नीषोमीयपरीतिग्राही तिककर्क
हरिहराद्यास्त्यपः कार्तिक्यादयस्तु कालाः आज्यं संस्कृत्येति एवं चाज्यसंस्काराधीनाः सर्व एवाहुतयः किंतु संस्कृत्येह हरिरिति रिक्तानंतया
विधानात् आज्यसंस्कारार्थपदमेवेत्यस्यादिष्टाहुतयः ततः आघाराज्यभागौ ततः पयसाहुतयो न च पूषागा इति मंत्रेण पोष्णहोमः अ
स्य तु अवणानुपदेशात् सिद्धस्यैवासादनं पत्यग्निं परिस्तीर्य पौष्णं अयपिना पूषा गा इति विष्णुस्मृतावुक्तं तत्र करशाखिपरं तस्य तंतस्
त्रकारत्वात् ततः पायसपिष्टकचरुम्यां उत्तरस्तोवदायस्विष्टकृत ततः संस्कृताज्यसाध्यो व्याहृत्यादिः प्राजापत्यं तो होमः उत्तरतंत्रत्वात्
तदानीमेवाग्निविसर्जनात् पूर्णाहुतिस्ततो बर्हिर्होमः होत्रे तथा दक्षिणा॥ ततो ब्रह्मदक्षिणा ततो ब्रह्मोद्वासनं सूत्रे प्रथमतो ब्रह्मवरण

स्योक्तनयात्सैव प्रथमतो दक्षिणा प्रावृत्तिक्रमानुरोधात् सा च पूर्णपात्रं वरो वा पूर्णपात्रं वरो वेत्यभिधानात् ततो होतुर्दक्षिणा सा च वस्त्रयु
गसुवर्णकांस्यरूपा होतुर्वस्त्रयुगं दद्यात् सुवर्णकांस्यमेव चेति विष्णुस्मृतेः सा च दक्षिणा कातीयकल्पेन्यद्विसि सर्वशाखाप्रत्ययमेकं कर्मेति न्या
यात् अत एव यजमान एव होतेति याश्वासमतमपास्तं सन्नवः दक्षिणाबाधापत्तेः शाह्यस्यापि यजमानस्यापदेशाच्च न च ब्राह्मणे यतमाने दक्षि
णाविधिरेव तदितरे तु यतमाने दक्षिणे निवार्यं होतुर्दक्षिणां दद्यादित्यत्र सयजमानक होतृमामात्रे परत्वे निर्वीजिसंकोचापत्तेः अथ प्रधानं
स्वामीफलयोगात् गुणे प्रतिनिधिः परार्थत्वादिति परिभाषाबलात् यजमान एव होतेति तन्मन्त्रं होमस्य गणत्वात् अथ दक्षिणादानपर्य
न्तेन कर्मणा होमपर्याप्तौ रुद्रान् जपित्वा उत्सृजेदग्निमिति सूत्रेण तत् याजमानिको रुद्राध्यायजपः ततो विष्णुसूक्तं लोहाकाराकानादितघृताहो
ममभिधाय अपस्कारमाह्वयेत् एकस्मिन् पार्श्वे नैकेण शालेनापरस्मिन्नंकितेयं हिरण्यवर्णेतिचतसृभिः शन्नो देवीरिति च स्नपयेत् स्नाना
लंकृताभिषिक्तं च ततस्तैर्भिर्वस्त्रतरीभिः सार्द्धमानीयं तल्प्रान पुरुषसूक्तं कृष्यां रौद्रं जपेत् मितमहं भक्त्यासमां रक्षतु सर्वतः एवं युवानं पत्नीं वो
दानिते न क्षीरं तीश्वरस्य प्रियेण मानः साक्षजनुषा सुभगा रौपस्योषेण सं मिषामदेमा वृषं वत्सतरीयुक्तमैशान्यां चालपेत् दक्षिणां होतुर्वस्त्रयुगं दद्या
सुवर्णकांस्यमेव च अपस्कारस्य दातव्यं वेतनं मनसेप्सितं पायसेन बहुसर्पिष्कं ब्राह्मणांश्चात्र भोजयेत् उत्सृष्टो वृषभोऽपत्र पिबत्स्यजलाशये
शृंगेणोल्लिखते भूमिं यत्र क्वचन दर्पितः पितृणामन्नपानं तत्प्रभूतमुपतिष्ठते आदित्यपुराणे यावन्ति पशुलोमानि वृषभस्य भवन्ति वै गवां वै

वतुलोमानि मुने पार्थ तिष्ठन्ति ततः तावत्कोटिसहस्राणि रुद्रलोके महीयते यत्किंचित्कुरुते पापं पुरुषो वृत्तिकर्षितः वृषभस्यैव भारेन पितरः
सपितामहाः आवर्तमानास्तृप्यन्ते स्वर्गलोके न संशयः जलेप्रविश्य लांगूलं तोयं चोद्धरते वृषः वर्षसहस्राणि पितरस्तेन तर्पिताः ग
वांमध्ये यत्रैव वृषभः क्रीडते तु यत्र अप्सरोघसहस्रेण क्रीडंते निमेव च यावल्लांगूलमुद्धृत्य तोयेषु क्रीडते तु सः अप्सरोगणसंघैश्च क्री
डंते पितरस्तदा सहस्ररत्नपात्रेण कनकेन यथाविधि तृप्तिस्तथा पितॄणां वै सा वृषेण समोच्यते एकस्मिन्निति अंकनं तु स्फिकद्वयस्थि
चोरंकनमिति चक्रचपद्धतौ लिखनात् तत्रापि त्रिशूलं दक्षिणे चक्रं वामे शूलं तु दक्षिणे पार्श्वे वाममेव च विनिर्दिशेत् इति तत्रैव लिखनात् इति के
चित् एतादृशवाक्यलिखनस्यान्यत्रक्वापि दर्शनात् वृक्षचयपद्धतौ तु पारिलिखनं तत्रातसारमेव अन्यैः सर्वैरनादरणात् किंतु वृषभोयं
हरिहरमूर्तिः चक्रशूलधारित्वात् तत्रापि दक्षिणभागो हरेः उत्तरभागो हरस्य हरिहरमूर्तेस्तथा सिद्धेः तथा च दक्षिणहस्ते चक्रं वामहस्ते शू
लमिति सिध्यति यत्तु दक्षिणहस्ते चक्रं वामे स्फिचि त्रिशूलमिति केचिन्मैथिला आहुः तन्न न हि पादेनास्य धारणं युज्यते यत्तु दक्षिणपार्श्वे च
क्रेण तत्सजातीयपरवामपार्श्वे त्रिशूलवृषांकनमिति मैथिलसंस्कृतं तन्न दापित। सजातीयपरवामपरयोः कर्मधारयाद्युक्तत्वपरमेवं न तु
सजातीयवामपार्श्वे इत्यर्थकं यच्छूलं लक्षणपतेः निषादस्य परस्याधिकरणविरोधाच्च हिरण्येति ॐ हिरण्यवर्णाः शुचयः पावका यासु
जातः कश्यपो यास्विंद्रः यां अग्निं गर्भं दधिरे सुवर्णास्तान आपः शं स्योना भवंतु ॐ यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्य

नूजनाना यास्त्वग्निमित्यादि ॐ यासां देवा दिवि कृण्वंति भक्षं या अंतरिक्षे बहुधा भवंति यास्त्वग्निमित्यादि ॐ शिवेन मा चक्षुषा पश्य
तापः शिवया तन्वोप स्पृशत त्वचं मे घृतश्चुतः शुचयो याः पावकास्ता न आपः शं स्योना भवंतु ॐ शन्नो देवीरभिष्टय आपो भवंतु पीत
ये शंय्योरभिस्रवंतु नः एवं सकलवत्सतरीसमेतं स्नापितं वृषभं ताभिः सलिलमलं कुर्यात् स्नानालंकरणमित्यभिधानात् अलंकरणं च
लोहघंटादिभिः घंटां लोहकृतां दद्यात् शंखैश्च पटलैः शुभैरित्यादित्यपुराणात् लोहनूपुरकनकपट्टिकेऽपि सर्वोपकरणे एतत्स्कंदपु
राणात् उपकरणमलंकरणं तच्च नूपुरकनकपट्टिकारूपमेव अन्यत्र तथादर्शनात् ततः सावित्र्यामघमर्षणं सूक्तं जप्यं ततो रुद्रान् पुरुष
सूक्तं कूष्मांडं अश्वजयेत् सावित्रीं च जपेत्तत्र तथा चैवाघमर्षणमित्यादित्यपुराणात् वत्सतरीभिः सार्द्धमानीय रुद्रान् पुरुषसूक्तं कूष्मांडी
श्च जपेदिति विष्णूक्तेः सावित्री च सव्याहृतिभिः प्रणवद्वयमध्यस्था जप्या ॐकारः पूर्वमुच्चार्यो भूर्भुवः स्वस्ततः परं सावित्री प्रणवश्चांते जप्ये
त्येवमुदाहृता इति याज्ञवल्क्योक्तेः अघमर्षणं सूक्तं च ऋग्वेदोक्तमित्याहुः संध्यावंदनवत् न तु याजुर्वैदिकमपि तैत्तिरीयं देयो वल्कोऽपि
लिखितात् अत एव कूष्मांडसूक्तं तैत्तिरीयं कूष्मांडी लिंग ये गृह्णंति ते भ्रांताः सूक्तत्वात् याज्ञवल्क्योद्दीर्णत्वाच्च कूष्मांडास्तु यद्देवा देवहेलन
मित्याद्यं दिव्यस्तीत्यंत्यस्त्रावः प्रदेवास्तिस्रोऽग्निवायुसूर्यदेवत्याः क्रमेणानुष्टुभः कूष्मांडीरिति माध्यंदिनशाखायां सर्वानुक्रमणे का
त्यायनवचनात् ततः कर्णेजपः ततदुत्सर्गः ततो वृषं वत्सतरीयुक्तमैशान्यां दिशि चालयेत् वृषं वत्सतरीयुक्तमैशान्यां चालये

दिशि इति ब्रह्मपुराणात् पंचनवबापश्चान्नैशाम्मां स्थितं प्रतिवालयेत् ततो वत्सतरीसहितवृषपूजा शिष्टाचारात् ततोमयोभूरित्यनुवा
कशेषेण कात्यायनोक्तं वृषाभिमंत्रणं ततस्तर्पणं तथा अथ चैत्र्यां वृषोत्सर्गः कार्तिक्यां वा प्रयत्नतः कर्तव्यस्त्वयरेवत्यां त्रिभिर्वर्णैर्द्वि
जातिभिः वृषभः कृष्णसारस्क प्रसयस्तु त्रिहायनः मनोज्ञो दर्शनीयश्च सर्वलक्षणसंयुतः अष्टाभिर्धेनुभिर्युक्तश्चतुर्भिरथवा क्रमा
त् त्रिहायनीभिर्दत्ताभिः सुरूपाभिश्च शोभितः सर्वोपकरणोपेतः सर्वसस्य धरो महान् उत्स्रष्टव्यो विधानेन श्रुतिस्मृतिनिदर्शनात्
प्रागुदक्प्रवणे देसे मतो ह्येनिर्जने वने नवाह्योननतस्सीरं यातप्रपंकेन वितुन्नवितृ स्वधापितृभ्यो मातृभ्यो बंधुभ्यश्चापितृत्तये मातृपक्षा
श्चये केचिद्धे वान्ये पितृपक्षजाः गुरुश्वसुरबंधूनां ये कुलेषु समुद्भवाः ये प्रेतभावमायन्नापे चान्ये श्राद्धवर्जिताः वृषोत्सर्गेण ते सर्वे लभं
तां प्रीतिमुत्तमां इत्यास्तेन मंत्रेणेति यवाःलाद्य तयुत्तजिल्ले पितृभ्यश्च समासेन ब्राह्मणेभ्यश्च दक्षिणां ततः प्रमुदितास्तेन वृषभेण सम
न्विताः वनेषु गावः क्रीडंति वृषोत्सर्गप्रसिद्धिषु अप्रमत्तो वृषोत्सर्गे दिभावक्रो त्रिभिः पदैः ब्राह्मणानां तु यत्किंचिन्मयोत्सृष्टं तु निर्जने नवा
ह्योन्नवतनुसीरंपातयंकेन विक्रवित् ततकश्चिद्दन्योननयेत्र विभोज्यं यथाक्रमं वृषोत्सर्गादि तेनान्यत्पुन्यमस्ति महीतले एवं च यथा पितृ
भ्यो मातृभ्य इत्यादिमंत्रेण पितृतीर्थाय वतिलयुतांजलित्रयेण तर्पणं अत्र च गोपुच्छानप्रवेशोऽप्याचारः प्रमाणं ततः कर्मकारायन दभिम
तवेतन दानं ततो ब्राह्मणानुद्दिश्य पत्रांकिं विदित्यादि वक्तव्यं ततो बहुसर्पिष्कपायसभोजनं ब्राह्मणेभ्यो देयं तदूस्याग्रे भोजयेच्च ब्राह्मणा

नैवेद्यविधौ सादित्यपुराणात् पायसं वै हुतार्थं स्कंद्राले णं श्रान्नं भोजयेदिति विष्णुवचनाच्च अष्टभिर्धेनुभिरिति इदं च धेनुपदं
वत्सतरीचतुष्टयपरमेव अन्यहापत्तीभिरित्युपसंहारात् वृषोपि त्रिहायन एव प्रसयस्तु त्रिहायन इत्येतद्वचनात् वत्सतरीणां चतुष्क
मष्टत्वं वा विकल्पेनु ग्राह्यं स च विकल्पः शक्त्यपेक्षया व्यवस्थितः प्रतिपदादिपंचम्यादिविकल्पवत् विषमशिष्टत्वादिति तत्र पार्वणेपि
नित्यत्वेन फलासंभावादेतत्तथा अत्र तु काम्यतया षोडशीग्रहणवत् फलमूलेति कार्त्तिक्यां तु वृषोत्सर्गे अयूपत्रयदानं प्राक् कार्त्ति
क्यां तु वर्त्तेयस्तक इत्याधूपान्न। संशय इत्यादित्यपुराणात् तत्र तन्त्रांगविध्युर्थैकरोकसतया सफलत्वेनोपस्थितस्य कार्त्तिक्यां वृषोत्स
र्गस्य सन्निधौ निःफलोपस्थितस्यास्य कालीठत्वात् इदं चायूपत्रयदानं कार्त्तिकीवृषोत्सर्ग एव कार्त्तिक्यामुपक्रम्यैवाम्नानात् एका
दशाहीयवृषोत्सर्गे दंपतिपूजनवत् दंपतिपूजनं त्वत्र प्रधानमिति विशेषः अशौचान्नद्वितीये ह्नीति तन्त्रोपक्रमात् इदं चायूपदानं प्र
सवरणात् भागव्यवधानेन कार्यं आनंतर्यवाचिना क्त्वाप्रत्ययेन तथैवोपस्थितेः अत एव आश्विनं ग्रहं गृहीत्वा सवनीयं पशुमुपा
करोतीति श्रुतेः सह पशूनालभत इति तन्त्रैव श्रवणाच्च अग्नीषोमीयसवनार्थविहितानां पशूनां सहालंभे प्राप्ते य इति षां यथापाठिता
नां सहालंभः क्रियते न दाश्विनग्रहग्रहणसवनीयपशूपाकरणीयपेशानं न पर्भंगस्यात् तथा त्वान्नोभयानुरोधात् तत्राग्नेः आश्विन
ग्रहग्रहः ततः सवनीयपशूपाकरणं ततस्यानिकक्रमात्वं ध्यपशूपाकरणं ततः शेषे अग्नीषोमीयपशूपाकरणमिति सिद्धान्तः तस्मा

पि॰त॰ दाभ्युदयिकश्राद्धानंतरमेवापूपदानमिति सिद्धं नच श्राद्धानंतरमपूपदानं दानं निःफलतामेतीति निन्दार्थवादादिति वाच्यं अपूप
दानं स्वेसमानेनापूपदानं वृषोत्सर्गयोरानंतर्यप्रतीतेः नवा नापि वरणादिना व्यवधानमिति वाच्यं वरणस्य ऋत्विक्त्वाख्यसंस्कार
१५ 15 जनकत्वेन वृषोत्सर्गकर्मांतर्गतत्वाच्च श्राद्धस्य च वृषोत्सर्गांगत्वेन ततो भिन्नत्वात् एवं चापूपदानस्य वृषोत्सर्गस्यानंतर्येणैव प्राप्त
तया ननिन्दार्थवादस्यावकाशो निरवकाशत्वादिति अयं च कार्त्तिक्यादिवृषोत्सर्गः प्रथमाब्दापकार्त्तिक्यादिना कार्यः वृषोत्सर्गस्य आभ्यु
दयिकांगकाम्यकर्मत्वात् नान्द्याकर्मणः प्रथमाब्दे निषेधात् तथैव काम्यं यत् कर्म वत्सर एव च प्रमाहृत्य इति वचनात् अत्र च कार्त्तिक्या
दौ वृषोत्सर्गे प्रथमः प्रधानसंकल्पः तेन विना प्रधानाधिकारानुपपत्तेः तत्र कामनाविषयीभूतं फलं तत्राधिकारिविशेषणं काम्य
फलकामस्यैवाधिकारात् तथा चाधिकारप्राप्तसर्वफलमिहमन्यते इति विधिसमभिव्याहृतेन तत्समभिव्याहृतार्थवादस्थेन फलेनाधि
कारिप्राप्तिः ततश्च शास्त्रोक्तसकलफलकामोधिकारी एकशास्त्रोक्तफलकामप्राप्तेश्चाधिकारिप्राप्तेः इति फलानां विकल्पेन कर्मण्यन्वयः अं
गानां तु तच्छास्त्रोक्तानां समुच्चयेन एकस्यैव कर्मणो बहुशाखासु आम्नातस्य प्रत्यभिज्ञानबलादेकत्वे सिद्धे तत्तत्प्रदेशेन तत्तदंगानां
मांकांक्षाबलादन्वये अंगानां समुच्चयः श्राद्धवत् तथा चात्र नानासूत्रोक्तान्यंगानि समुच्चीयंते श्राद्धवत् फलानि तु विकल्प्यंते तदित्थं
तत्प्रमाणानुष्ठानक्रमः आदौ प्रधानसंकल्पः कृत्वा ततो मातृपूजां संकल्पपूर्विकां ततः आभ्युदयिकं संकल्पपूर्वकं विधाय ततो वैश्व

देववलिकर्माधिकारीचेद्यजमानस्ततस्तदुभयंकृत्वाकार्त्तिक्यांचैत्र्यामपूपचरुप्रभृतिग्रहहन्त्वाब्राह्मणंततोहोतारंवृत्वा ततःप्रागुद
क्प्रवणेदेशेअग्निस्थापनादिविहितहोमान्तकर्मणिहोत्रासमापितेततोयजमानःश्रमणेपूर्णपात्रंहोत्रेवस्त्रयुगसुवर्णकांस्यानिनिर
क्षिणान्दत्वाततोऽपस्कारमाहूयअंकनाग्रेषंकृत्वाततोदक्षिणवामहस्तयोर्यथाक्रमंचक्रेणशूलेनवृषमंकयित्वापंचकृत्वोमंत्रे
णकुशोदकेनाभ्यस्यततोलोहघंटादिभिःपवमानवनाग्नलकत्सत्यगायत्रीमघमर्षणंरुद्रान्पुरुषसूक्तंकूष्मांडीश्चजपित्वामंत्रद्व
यंवृषभस्यदक्षिणकर्णेजपित्वाकुशात्रयतिलजलान्यादायसमयमुल्लिख्यएतंयुवानंपतिंवोददानीतिइस्वावेत्वारोपिवर्णावृषभ॰
मुत्सृजेरन् अनयैवोत्सृजेरन्त्रितिपारस्करवचनात् स्त्रियास्तुनाधिकारःउत्सर्गकरणीभूतायाम्विददानीसुत्तमपुरुषश्रुतेःत॰
स्यायतमानत्वसिद्धेः अन्नविस्त्रियांतद्बाधेनपातमानत्ववाधादिति ततोवृषंवत्सतरीयुक्तमैशानींदिशंचालयेत् ततोवत्सतरीसहि
तंवृषंपूजयेत् ततोमयोभूरित्यनुवाकशेषेणाभिमंत्रयेत् ततःॐस्वधापितृभ्योमातृभ्योबंधुभ्यश्चापितृप्तयेइत्यादिमंत्रेणयवे
तिलसंयुक्तांजलिंत्रपेणपितृतीर्थेनतर्पणंकुर्यात् ततःकर्मकारायनदभिमतवेतनंदद्यात् ॐयत्किंचिछिन्नमपोस्पृष्टंतस्मान
नयेनवाहंततसीरंनयानमेकेनवितकदितितनाब्राह्मणानुद्दिश्यवरेत ततोदग्नेवहस्तविष्ठंपायसंब्राह्मणाननुभोजयेत् ततोऽ
मस्वंगांसदस्यखुरांमुक्तालांगूलभूषितांकांस्योपदोहांवस्त्रयुगच्छन्नांसवत्सांकपिलांदद्यात् ततःस्वहस्तेनजलंगृहीत्वागंगादितीर्थे

जलत्वेनध्यात्वातेनात्मानमभिषिच्य अहतेनशुद्धवाससीपरिदध्यादिति यत् शूद्राणाममविद्यत्वेनाधिकारोमाभूदितितिन रधिकारस्ति
घ्यर्थक्कल्पनेनाप्यसजन्मनस्युक्तं तथाचांसजन्मपदेनाविद्यपरतयाशूद्रसंग्रहः अविद्यःस्वंचशूद्राणांस्त्रिवर्स्त्रीणामपीतितासा
मप्यधिकारोअनेनबोध्यते सामान्यकल्पनापांत्वाघवानुग्रहात् तंडुल्लाहाराद्विवुरिति तन्ननहिदृष्टांतबलेनलक्षणाकल्प्यतेअ
तिप्रसंगात् किंचतत्रहिपयसनिरस्तंनहविष्मत्त्वमास्यस्तुदियात् सर्वेवांतंतंडुलात्विभजेदितिसामान्याश्रवणात् मुख्यातंडुलपय
सहविःसामर्थ्यपरताएवमजाकामागवामननमुपेयुरितिश्रुतं तस्पुंवाहगणत्वात् नद्यदृशाहविकृतित्वेनतद्दृहर्गण
पूरणेअहस्त्वविवक्षायामितिमनताश्रपणाग्रतानस्यादितितत्वविवक्षायद्धाप्रायणीयोदयनीयावाच्छिन्नमसापरंवात्क
मैकलापपरमिहाहःपदंअन्यथाषडहादेरपिप्रायणीयोदयनी यपरत्वापत्तास्यादिति अत्रतुनतद्वत् किमप्यनिर्वमायततिप
नोसजन्मपदमविद्यपरंकल्प्यतेतस्मात्स्वर्गकिरणीभूतायामेतेषुवानंपत्तिवोदहनीतिश्रवितुत्तमपुरुषवत्वेनयाजमान्यां
सिद्धायामनत्वल्पियोस्तत्मताधिकारःस्वर्गकामत्वाविशेषेपिधागांतरेस्त्रीशूद्रवत् शूद्रस्यतुहत्येनाप्यसजन्मनइतिवृष
विशेधापदेशादन्यथानुपपत्त्याअधिकारेसिद्धेतुरषेणशूद्रःपितृगतस्वर्गकामोवृषोत्सर्गंकुर्यादितिविधावाक्षिप्तेतस्यकामिनो
दयोत्सर्गयागविषयकेममेदंकार्यतयाज्ञानेप्रवर्त्तकेसिद्धेकामिनोममेदंकार्यमितिप्रवर्त्तकंज्ञानंफलश्रितरस्कनियोगाविषयीभूतत्वेया

पामेवसेभवतीतिनियमेनशूद्रस्यापिसर्वांगसंपन्नवषो। सर्गाधिकारेसिद्धान्तएवशूद्रोपिसर्वमंत्रसंमंत्रवषो। सर्गंकुर्यादि

तिसिद्धं नचैवंश्राद्धेपिशूद्रस्यांगभूतसर्वमंत्राधिकारःस्यात्प्रधानाधिकारवलादितिवाच्यं तत्रमन्त्रवर्जमितिविशेषोपदेशादि

तिऐशानीतःपरिस्तरणंतुऐशानीतःसौम्यांतकर्तव्यं आवृत्तिस्तामान्येप्रदक्षिणमिति परिभाषायांकात्यायनसूत्रात् एवमेव

हरिहरवासुदेवकर्कमहोमहोपाध्यायवर्द्धमानादिलिखनाच्चेतिहोमेतुयागदेवसंवर्तसंज्ञासाहस्त्यादिकाषष्ठीच अशारीरितितदुक्तं

शतपथेषष्ठेवांडेनुखासंभरणनाम्नि तथाहि तमब्रवीद्रुद्रोसीतितद्यदस्यनामाकरोदग्निस्तद्रूपमभवदग्निर्वैरुद्रोयदरोदीत्तस्मादु

द्रःसोब्रवीज्ज्यायान्वाअतोस्मिधेह्येवमेनामेतितमब्रवीत् सर्वोसीतिसर्वलपर्यायाश्चायंसर्वशब्दस्तेनहंसादिरेव यतुस्वाहा

प्राणेशर्वमितस्तामाप्यामितितद्दिहनान्वेति शतपथोक्तस्यैवनामनवकस्यहारिहरवासुदेवादिभिरुपग्रहात् विंचताल्ल्यादिःसि

तिमूर्त्तिःअयंतुसर्वोजलमूर्त्तिःतथैवशतपथात् तद्यदस्यतन्नामाकरोदापस्तद्रूपमभवन्नापोवैसर्वोद्भ्योहीदंसर्वंजायते सोब्रवी

ज्ज्यायान्वाअतोस्मिधेह्येवनामेनामेतितमब्रवीत्पशुपतिरसीति तद्यदस्यतन्नामाकरोदोषधयस्तद्रूपमभवन्नोषधयोवैपशु

पतिःतस्माद्यदापशवओषधीर्लभंतेथपतीयंतिसोब्रवीज्ज्यायान्वाअतोस्मिधेह्येवमेनामेतितमब्रवीदुग्रोसीतितद्यत्तन्नामाक

रोद्वायुस्तद्रूपमभवद्वायुर्वाउग्रस्तस्माद्यदावलवद्वात्युग्रोवातीत्याहुःसोब्रवीज्ज्यायान्वामाकरोद्विद्युत्तद्रूपमभद्विद्युद्वा अशनिस्तस्माद्य

विघुद्दंसश निवरधी हिंसाहुः सोब्रवीज्ज्यायान्वा अतोस्मि धेह्येवमेनामेतितमब्रवीश्हा निरसीति उघस्त्वतन्नामाकरो ह्दिघुत्तद्रूप
मभवद्दिघुद्वाश्मशानिस्तस्माह्यं विघुद्दंसश निवरधी हिंसाहुः सोब्रवीज्ज्यायान्वा अतोस्मि धेह्येवमेनामेतितमब्रवीम्स्वोसीतितघे
स्पतन्नामाकरोत्पर्जन्यस्तद्रूपमभवत्पर्जन्यो वै भवः पर्जन्याद्धीदं सर्वं संभवति सोब्रवीज्ज्यायान्वा अ। स्मि धेह्येवमेनामेतितमब्रवीन्महो
वोसीतितघस्त्वतन्नामाकरोच्चंद्रमास्तद्रूपमभवत्प्रजापतिर्वै चन्द्रमाः प्रजापतिर्वै महान्देवः सोब्रवीज्ज्यायान्वा अतोस्मि धेह्येव
मेनामेतितमब्रवीदीशानोसीति तघस्त्वतन्नामाकरोदादित्यस्तद्रूपमभवदादित्योवा ईशान आदित्योह्यस्य सर्वस्येष्टा सोब्रवीत्ता
वान्वा अस्मि मामतः परो नामधा इति अथ वृषपरीक्षा तत्र मत्स्यपुराणे मनुरुवाच भगवन् श्रोतुमिच्छामि वृषभस्य तु लक्षणं वृषो
त्सर्गविधिं चैव तथा पुण्यफलं महत् मत्स्य उवाच धेनुमादौ परीक्षेत सुशीलां लक्षणान्वितां अव्यंगामपरिक्लिष्टां जीववत्सामरोगि
णीं स्निग्धवर्णां स्निग्धखुरां स्निग्धश्रृंगां तथैव च मनोहराकृतिं रम्यां सुप्रमाणामनुद्धतां आवर्तैर्दक्षिणावर्तयुक्तां दक्षिणतश्च या वा
मावर्तैर्विमितश्च विस्तीर्णजघना तथा मृदुसंहततान्मोष्ठी रक्तजिह्वा सुपूजिता श्वशफा वरीयस्या स्फुटिका रक्तजिह्वा तयात्वया अनस्ता वि
ननेत्रा च शफैरविरलैर्दृढैः वैडूर्यमधुवर्णैश्च जलबुद्बुदसन्निभैः रक्तस्निग्धैश्च नयनैरेतैरेव कनीनकैः सप्तचतुर्दशांतां भवेद्या वतालुका
उरःपृष्ठी शिरःकुक्षी श्रोणी च वसुधायाः षडुन्नतानि धेनूनां पूजयंति विचक्षणाः कर्णौ नेत्रे ललाटं च पंच भास्करनन्दन समाप्तानिस

संतेपुच्छंसास्नान्वसक्तिनी चत्वारश्चस्तनासजन्मन्वमष्टौमणीषिभिः शिरोग्रंवापुनंसेतेभूमिपाजस्तदाह्या तस्याःस्तुतंपरी
क्षेतवृषभंलक्षणान्वितं उन्नतस्कंधककुदमृजुलांगूलभूषितं मुहाकटितटस्कंधंवैडूर्यमणिलोचनं प्रधानगर्भश्रृंगाग्रंस्तुती
र्घमक्षवालधिं नवाष्टदशासंख्येस्त्वतीक्ष्णाग्रैर्दशनैःशुभैःमुल्लिकाख्यश्चमोक्तव्योगृहेपधुनधान्यतः स्वस्तिकाकारश्रृंगा
श्चमेघौघसदृशस्वनाः महाप्रमाणाश्चतथामत्तमातंगगामिनः महोरस्कामहोघूसामहाबलपराक्रमाः शिरःकर्णौललाटं
रंचवालधिश्चरणानिच नेत्रेयाश्चैचुकृष्णानिशास्यंतेचन्मस्त्विषः श्वेतान्येतानिशास्यंतेकृष्णस्यतु विशेषतः भूमौकर्षतिलां
गूलंप्रलंबस्तुनवालधिः पुरस्तादुन्नतोनीचैःपृष्टतश्चप्रशस्यतेशक्तिध्वजपताकाभायेषांमूर्द्धिविराजते अनड्वाहस्तुधन्या
स्तेवितजीवजयावहाः प्रदक्षिणंनिवर्त्तन्तेस्वयंयेविनिवर्त्तिताः समुन्नतशिरोग्रीवाधन्यास्तेपूथवर्द्धनाः रक्तश्रृंगाग्रनयनःश्वेतवर्णो
भवेद्यदि श्रृंगैःप्रवालसदृशैर्नास्तिधन्यतरस्ततः वर्णतस्ताम्रकपिलोब्राह्मणस्यप्रशस्यते श्वेतोरक्तश्चगोरश्चकृष्णःपाटलएवच
भद्रिणस्तूलितःपृष्टस्थलःपचकालकःपृथुकर्णोमहास्कंधःसूक्ष्मरोमाचयोभवेत् रक्ताक्षःकपिलोयश्चरक्तश्रृंगतलोभवेत् श्वेतो
दरःकृष्णपृष्टश्चब्राह्मणस्यप्रशस्यते स्निग्धरक्तेनवर्णेनक्षत्रियस्यप्रशस्यते कांचनाभेनवैश्यस्यकृष्णेनाप्यग्रजन्मनः यस्यप्रागा
यतेश्रृंगेसुमुखाभिमुखेतथा सर्वेषामेववर्णानांसर्वसर्वार्थसाधकः मार्जारपादःकपिलोधन्यःकपिलपिंगलः श्वेतोमार्जारपादस्त

धन्योमणिनिभस्तृणः करटः पिंगलश्चैव श्वेतपादस्तथैव च सर्वपादमितोपश्च द्विपादः श्वेत एव च कपिंजलनिभो धन्यस्तथा तित्तिरस
न्निभः अकर्णमूलात्पुच्छं तु मुखं यस्य प्रकाशते नान्दीमुखः सविज्ञेयो रक्तवर्णो विशेषतः श्वेतं च पठरं यस्य भवेत्पृष्ठं च गोपतेः ऋषभः
ससमुद्राख्यः सततं कुलवर्द्धनः मल्लिकापुष्पचित्रस्तु धन्यो भवति पुंगवः कमलैः मंडपैश्चापि चित्रो भवति भाग्यदः अतसीपुष्पवर्णाः
स्तथा धन्यो नरः स्मृतः एते धन्यास्तथा धन्यात् कीर्त्तयिष्यामि तेन्नृप कृष्णताम्रोष्ठदशना ताम्राश्वशृंगा शफाश्च ये अव्यक्तवर्णा ह्र
स्वाश्च व्याघ्रचर्मनिभाश्च ये ध्वांक्षगृध्रसवर्णाश्च तथा मुषकसन्निभाः कुब्जाः काणाश्च खंजाश्च केकराक्षास्तथैव च विशेषः श्वेतपादा
श्च उद्भ्रान्तनयनास्तथा नैते वृषाः समोक्तव्या न च धार्यास्तथा गृहे मोक्तव्यानां च धार्याणां भूयो वक्ष्यामि लक्षणं स्वस्तिकाकारशृंगा
श्च पूर्णसदृशास्वताः महाप्रमाणाश्च तथा मत्तमातंगगामिनः महोरस्का महोच्छ्रासा महाबलपराक्रमाः शिरः कर्णौ ललाटं च वाल
धिश्चरणानि च नेत्रपार्श्वे च कृष्णानि शस्यते चंद्रसन्निभः श्वेतान्येतानि शस्यंते कृष्णस्य तु विशेषतः एते धार्याः प्रयत्नेन मोक्तव्याश्च दि
चाव्रषाः धारिता परिवामत्ता धनधान्यविवर्द्धनाः चरणानि मुखं पुच्छं यस्य श्वेतानि गोपतेः लाक्षारससवर्णश्च तन्नीलमिति निर्दिशेत्
वृष एव समोक्तव्यो नैव धार्यो गृहे भवेत् तदर्थमेवाचरति लोके गाथा पुरातनी गौरीं वाप्युद्वहेत्कन्यां नीलं वा वृषमुत्सृजेत् एवं वृषं लक्ष
णसन्नियुक्तं गृहोद्भवं क्रीतमथापि राजन् मुक्त्वा न शोचेत्स्मरणं महात्मा मोक्षंगतिं चाहमणेभिधास्ये तदस्य संहेयः सुशीलाशुभलक्ष्.

णा॥ अथगा॥ अपरिक्लिष्टा जीववत्सा अरोगिणी स्निग्धवर्णा स्निग्धखुरा स्निग्धवक्त्रा मनोहराकृतिः सौम्या सुप्रमाणा अनुवृत्ता दक्षि
णभागे दक्षिणावर्त्तैर्वामभागे वामावर्त्तैर्युक्ता मृदुसंहतताम्रौष्ठी असमावदीर्घा स्फुटितरक्तजिह्वा अनस्रावितनेत्रा अविरलसुदृढ
शफा वैडूर्यमधुवर्णनेत्रतारका जलबुद्बुदनिभे रक्ते स्निग्धे वा नयने यस्याः सा दृशीकनीनिका अश्यावतालुका उरः पृष्ठं शिरः कुक्षिद्वयं
श्रोणीद्वयं षडपि यस्या उन्नतानि कर्णौ निम्ने ललाटं च तथा पुच्छं सा स्नासक्थिनी च समायतानि एवं चतारस्तनाः एवं च शिरोग्रीवा च समा
यता एतादृश्या धेनोः पुत्रः दुन्नतस्कंधककुच् चर्जुलांगूलः महाकठितटः महास्कंधः वैडूर्यसदृशलोचनः सुदीर्घवालधिः नवाष्टदशासं
ख्यैः स्तीक्ष्णाग्रैर्दशनैर्युक्तः स्वस्तिकाकारशृंगः मेघौघसदृशस्वनः महाप्रमाणः महामातंगगामी महोरस्कः महोच्छ्रूसः महाबलपराक्रमः
शिरः कर्णौ ललाटं च वालधिचरणानि च नेत्रपार्श्वे च शुक्लस्य कृष्णानि कृष्णस्य शुक्लानि प्रशस्यंते भूमिस्पर्शिलांगूलः प्रलंबस्थूलवा
लधिः पुरस्तादुन्नतः पृष्ठतो नीचः प्रशस्यते शक्तिध्वजपताकाव्यंतमल्लो छिन्नशिराः प्रशस्यते प्रदक्षिणविनिवर्त्ती समुन्नतशिरोग्रीवः
श्वेतवर्णः सन् रक्तशृंगाग्रनयनः प्रशस्ततरः तथा ब्राह्मणस्य ताम्रकपिलः तथा श्वेतैकवर्णः कृष्णैकवर्णः यथाक्रमं वर्णानां प्रशस्तपृथुक
र्णः महास्कंधः सूक्ष्मरोमा रक्ताक्षः कपिलश्च रक्तशृंगः श्वेतोदरः एतादृशो ब्राह्मणस्य स्निग्धरक्तः क्षत्रियस्य काञ्चनाभो वैश्यस्य कृष्णः शू
द्रस्य यस्य तत्र गा यते समुखाभिमुखे वा शृंगे स सर्वेषां वर्णानां शस्तः चरणानी सा स्विच्वारः मुखं पुच्छं च श्वेतानि शरीरं लाक्षारससवर्णं

पि.त.

१९

१७

सनीलः सगृहेन धार्यः किंतु मोक्तव्य एव तस्य तूत्सर्गमोक्षः फलं इममेवोपक्रम्य एवं वृषलक्षणसन्निमुक्तमिति मत्स्यपुराणेभिधानात्
अन्यस्य तु उक्तलक्षणस्य वृषस्योत्सर्गे विषवत्सतरीरोमसमसंख्यवर्षकोटिसहस्रावछिन्नरुद्रलोकमहितत्वसहस्रलरलपात्मकनकपात्र
ककरणहविर्दिनजन्मत्स्तिसमत् पितृवृषोत्सर्गे द्विपस्य पितुर्भवति यन्नरुल्लरवृषभोयत्पयः पिबति शृंगेणभुवमुल्लिखतिजलेलांगू
लमुत्क्षिपति गोभिः क्रीडति तत्कालीनं बहुतरफलं वृषोत्सर्गस्य लिखितं तदप्युक्तं न तु क्रियाकरणोपाधिकं हितन् फलं तत्करणे सर्वथैवा
संभवतीति न सकलस्य निःसंशयात्मनत् कामस्यात्राधिकारः इत्थं तयाविश्वजित्स्यापसिद्धः स्वर्गो वा कार्त्तिक्यां वृषोत्सर्गस्य फलं प्रकृतश्रा
द्धाशौचांते तु शय्यादानादिस्ताधारणः स्वर्गो वा प्रेतलोकविमुक्तिपूर्वकस्वर्गलोकप्राप्तिर्वा फलं एकादशाहश्राद्धे तु सेतादिनाप्रतिबंधे। किंच मा
ऐकादश्याकांचनपुरुषकपिलगवीदानानि स्वपतिपूजा वृषोत्सर्गोन्न भवति प्रकृतश्राद्धाशौचांतरुपदेशितकालाभावात् श्राद्धेरीयवत्सर्गे
भवत्येव तस्य श्राद्धोत्तरसमयकत्सतात् श्राद्धप्रयोगांतर्गतिं तु छत्रोपानहदानमावर्त्ते तदप्युक्तं श्राद्धशरीरभिन्नफलकस्य तदानीं शपका
भावात् न च प्रयोगविधिरेवायं मायकः तस्य मापकाभावात् विधिर्हि माय यपतिन तु प्रयोगविधिः ननु प्रेतषोऽशीतावत् काम्याप्रेतत्वविमुक्ति
रूपफलश्रुतेः काम्यापूर्वि च सर्वांगसंपन्नेनैव कर्मणा स्यतोऽत्र पात्रके च कर्मणि बहुतरांगहानिः तस्मात् प्रेतषोऽशीसपात्रकेन कार्या एवमेव
सोपानलिरवनमयीतिकेचित् तत्रोच्यते सोपानत्कतो हि माभावकराः नेवस्तु सिद्धं तावच्छंभेनानवधूतु नाम किंतु मन्मनं मुनिवचनविरुद्धं तथाहि एका

१९

हेदृग्दृशायवेतितावन्मुनिवाक्यं तत्र चतुर्दशानां मासिकानां नयासपिंडीकरणस्य च सपात्रकत्वे सर्वत्रपात्रकत्वेवास्तु नत्वाद्यश्राद्धे सपा
त्रकत्वमस्त्वपात्रकत्वमित्यर्द्धजरतीयुज्यत इति ॥ अथ प्रयोगः ॥ आशौचांतदिनचरमायां प्रातःसंध्यायां मौलस्नानं कृत्वा ततः सूर्योद
ये सति विधिस्नानं ततः संध्यावंदनं ततः पितामहादितर्पणं ततः पंचदेवतापूजनं कृत्वा शय्यादानादि उदकुंभांते कर्मकलापं समाप्य वैश्व
देवहोमबलि पितामहादिनित्यश्राद्धं तं कर्म कृत्वा ब्राह्मणो यजमानश्च तत् श्राद्धं निमित्रान्यानेकादशब्राह्मणान् पृथुकादिना भोजयेत्
आवृत्ते स्थाने परिक्षिप्ततिलसिद्धार्थके छागरजस्वलामयपस्ये दक्षिणापरपूर्वपतिकाकोलूकगृध्रघनवलोकिते स्थाने सपिंडिलि
याप्राकेशास्वधेषषुनाचेछ्राद्धं कुर्वन्ततः ॐ पित्रे त्वा जुष्टं प्रोक्षामीति सपसव्येन कुशाग्रयोदकेन पशुं प्रोक्षेत् यजमानः शुचिः शुक्लेनतद्दिन
क्षालितदृढवासाः वामहस्तधृतबहुकुशदक्षिणानामिकाधृतकुशत्रयसुवर्णरजतपवित्रोदधाधृतबहुकुशदक्षिणानामिकाधृतकुश
त्रयसुवर्णरजतपवित्रोदधात् तत्र क्रमः ॐ सोपकरणशय्यायै नमः ३ ॐ ब्राह्मणाय नमः ३ इमां सोपकरणशय्यां दत्तानि इति द्विज
करे जलदानं ॐ इदं स्वेतितेनोक्ते कुशोदकेन शय्यामभिषिच्य कुशादिकमादाय ॐ अद्याशौचांतदिने प्रेतस्य अमुकगोत्रस्य पितुरमुक
शर्मप्रेतस्य स्वर्गकामः इमां सोपकरणशय्यां विष्णुदैवताममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति कुशत्रयतिलजलैर्ब्राह्म
णस्य दक्षिणहस्तमध्ये दद्यात् ॐ स्वस्तीति प्रतिवचनं स्वर्गप्रदानंतरं तु मासिप्रदानं देयं स्वर्गार्थिकत्वे पौनरुक्त्यात्तत्क्षिप्रार्थिकत्वे कार्यत्वात्

पित॰ स्वर्गप्राप्तिर्हि सिमावायलक्षणा सा चाकाम्या विश्वजिन्न्यायेनास्पृष्टा च सन्निन्यायः स्वर्गमात्रं स्पृशति तस्मात्स्वर्गः सर्वेनिमेस विशेषा
दितितन्नाभिधानात् ततः ॐ अद्य कृतैतत्सोपकरणशय्यादानप्रतिष्ठार्थमिदं हिरण्यमग्नि दैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय
२० 20 दक्षिणां तुभ्यमहं संप्रददे इति द्विजदक्षिणकरे दद्यात् ॐ स्वस्तीति प्रतिवचनं ततः स दक्षिणेन दक्षिणहस्तेन ब्राह्मणः शय्यां स्पृशेत् ॐ
फलवस्त्रसमन्वितकांचनपुरुषाय नमः ३ ॐ ब्राह्मणाय नमः ३ ॐ इमं फलवस्त्रसमन्वितकांचनपुरुषं ददानीति द्विजदक्षिणकरे जल
दानं ॐ ददस्वेति प्रतिवचनं ततः। कांचनपुरुषं कुशोल्केन शाक्ष्य ॐ अद्याशौचांतद्वितीयेन्हि अमुकगोत्रस्य पितुरमुकशर्मप्रेतस्य स्व
र्गकामइमं फलवस्त्रसमन्वितकांचनपुरुषं विष्णुदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति ब्राह्मणस्य दक्षिणह
स्ते मध्ये दद्यात् ॐ स्वस्तीति प्रतिवचनं ततः ॐ अद्य कृतैतत्फलवस्त्रसमन्वितकांचनपुरुषदानप्रतिष्ठार्थमिदं हिरण्यमग्नि दैवतम
मुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति द्विजदक्षिणकरे दद्यात् ॐ स्वस्तीति प्रतिवचनं ततः स दक्षिणेन दक्षि
णहस्तेन ब्राह्मणः कांचनपुरुषं स्पृशेत् ब्राह्मणाभावे दैवतमित्यनंतरं यथानामगोत्राय ब्राह्मणायाहं ददे इत्युत्सृजेत् एवं कांचनपुरुष
कपिलयोरपि दक्षिणानंतरं तु प्रतिपत्त्यनंतरं नाम तत्सदृशामिमदाभ्यां घटितं कोनामासीति प्रश्नेऽमुकशर्माहं भोऽइति कात्यायनेनोक्तक
रणात् यतु वृषोत्सर्गाकरणे पिएकादशाहे दंपतिपूजनं तन्मंदं बायकाभावात् तद्धि वृषोत्सर्गांगं प्रधानं चास्त। सर्वेषां नैरंतर्येण का

र्यग्न्यानंतर्यविविक्तावल्लात् अतएवसाग्रस्केआग्निनंग्रहंगृहीत्वासवनीयंपशुमुपाकरोतीतिश्रवणात्वैकृताग्निनग्रहग्रहण
सवनीयपशूपाकरणयोर्नैरंतर्यबलात् प्राकृतस्यअग्नीषोमीयपशूपाकरणसवनीयपश्वुपाकरणयोःक्रमस्यभंगोगौणक्रिय
तइति अथदक्षिणहस्तात्कुशात्रयमयसार्प्य ॐअद्याशौचांतद्वितीयेह्निअमुकगोत्रस्यपितुरमुकशर्मप्रेतस्यस्वर्गकामोमे।द्विजं
पती अहंपूजयिष्येइतिसंकल्पएषोर्घः ॐद्विजंदंपतीभ्यांनमः इदमनुलेपनंॐद्विजंदंपतिभ्यांनमःपुष्पादिभिः ॐद्विजंदंपतीभ्यांनमः
ॐएषधूपः ॐद्विजंदंपतीभ्यांनमःएतानितांबूलानि ॐद्विजंदंपतीभ्यांनमः ततश्चद्विजंदंपतीप्रणमेत् अलंकुर्दंपतीभ्यांनमःएतानितां
बूलानि ॐद्विजंदंपतिभ्यांनमःततश्चद्विजंदंपतीप्रणमेत् अलंकुर्वीततत आचम्य ॐअद्याशौचांतद्वितीयेह्निअमुकगोत्रस्यपितुरमुक
शर्मप्रेतस्यप्रेतलोकविमुक्तिस्वर्गलोकप्राप्तिकामःसोपकरणवस्त्रतल्पपीठकसहितवृषोत्सर्गमहंकरिष्ये वत्सतरीचतुष्टयपक्षेअष्टक२
स्थानेचतुष्टयपदंप्रयोज्यं अत्रतुप्राप्तिपदंप्रकृत्यनुरोधात् तथाहि अहन्येकादशेप्राप्तेयस्यचोत्सृज्यतेवृषः प्रेतलोकाद्विमुक्तःसन्स्वर्ग
लोकंसमश्नुते ॐअद्यामुकगोत्रस्यपितुरमुकशर्मप्रेतस्यकर्तव्यस्यसंगीभूतहोमकर्मणिकृताकृतावेक्षणरूपब्रह्मकर्मकर्तुमेभिःपुष्पचं
दनतांबूलहेमालंकरणवासोयुगैरमुकगोत्रममुकशर्माणंब्राह्मणंब्रह्मत्वेनत्वामहंवृणे इतिब्राह्मणंवरणुपात् ॐवृतोस्मीतिप्रतिवच
नं ॐयथाविहितंकर्मकुरुइतियजमानेनोक्ते।ॐकरवाणीतिप्रतिवचनं ततॐअद्यामुकगोत्रस्यपितुरमुकशर्मप्रेतस्यकर्तव्यवृषोत्सर्गांग

भूतहोमकर्मकर्तुममुकगोत्रममुकशर्माणं ब्राह्मणमेभिः पुष्पचन्दनताम्बूलहेमालंकरणवासोभिर्होतृत्वेन त्वामहं वृणे इति वृ
णुयात् ॐ वृतोस्मीति प्रतिवचनं ॐ यथाविहितं कर्म कुर्विति यजमानेनोक्ते ॐ करवाणीति प्रतिवचनं ततो मंडपस्यैशान्यां प्रागु
दगप्रवणे देशे कुशत्रयेण हस्तमात्रां भूमिमुदक्संस्थं परिसमुह्य कुशानैशान्यां परित्यज्य गोमयोदकेनोदकसंस्थमेवोपलिप्य स्फ
्येन तदलाभे स्रुवमूलेन हस्तमात्रमुदक्संस्थं त्रिरुल्लिख्य उल्लेखनक्रमेणानामिकाङ्गुष्ठाभ्यां पूर्ववत्त्रिमुल्लिख्य उदक्संस्थरेखाभ्यो मृदमु
त्सृज्य वारिणा तं देशमभ्युक्ष्य नवेन कांस्यपात्रेणं तत्र प्रसन्मुखमग्निरोप्य अग्नेर्दक्षिणतः परिस्तरणभूमिमपस्य तत्र यज्ञियपदात्मयं
शुद्धमासनं धृत्वा तदुपरि प्रागग्रान् कुशान् धृत्वा ब्रह्माणं बर्हिस्तिं चहेवयिष्यात् प्रदक्षिणमानीयोदङ्मुखं तस्मिन्नासने उपवेशयेत् ततो
ग्नेरुत्तरतः स्तरणभूमितो बहिः कुशत्रयं प्रागग्रमुनराग्रं वा धृत्वा तत्सांतरालं प्रसार्य जलाज्यधारणयोग्यं धृत्वा तत्रैकभागे जलमपरभागे
दग्ध निधाय बर्हिषां छायां घब्रह्मणे मुखमवलोक्य कुशेण परिनिरुध्यात् ततो मुष्टिमात्रमुपमूलसङ्कॢप्तं बर्हिरादाय वामहस्ते धृत्वा दक्षिण
हस्तेन ऐशानीतः सोम्यां तं संलग्नमेव परिस्तरणं कुर्यात् आवृत्तिसामान्ये प्रदक्षिणमिति श्रौतकात्यायनवचनात् यत्तु आग्नेयादिशानां
तं ब्रह्मणोऽग्निपर्यन्तं नैतत्साधु यस्मात् अग्नितः प्रणीतापर्यन्तं परिस्तरेत् परिस्तीर्य पुरस्ताद्दक्षिणतः पश्चादुत्तरतः इत्युदक्संस्थमाश्व
लायनेनोक्तं न तत्र अग्न्येतरेपरं तस्य न तु सूत्रकारत्वात् ततोऽग्नेरुत्तरतः प्रणीतापर्यन्तमपविद्यासानं तु यथापवित्रच्छेदनार्थं कुशत्रयं पवित्र

करणार्थंसाग्रंगर्भगभ्याग्रतिरिक्तंकुशपत्रद्वयंप्रोक्षणीरयोधंतुंहोमयिमाज्यंधंतुंनाम्नस्थालीपायसस्वर्वर्थमितिकास्थाली स्रुवसं
मार्जनार्थंकुशत्रयं उपयमनार्थंवेणीरूपकुशत्रयंहोत्मारेशमितपलाशसमिधात्रयंस्रुवः आज्यंतंडुलाःदुग्धंएवमासाद्यतदुत्तरतः
पोक्षंसिद्धमेवपिष्टमयचरुं ब्रह्मदक्षिणार्थंपूर्णपात्रंहोतृदक्षिणार्थंवस्त्रयुगसुवर्णकंवास्वास्तुपकल्पयेत् ततोमौनी आसादितकुशप
त्रद्वयमादायप्रादेशमात्रंसमादायपवित्रंछेदनंकुशैःकरणभूतैश्छित्वातान्कुशानपास्यसपवित्रकरेणप्रणीतोदकंत्रिःप्रोक्षण्यांनिधा
यप्रस्यहस्ताभ्यांप्रांतयोर्धृत्वातज्जलंत्रिरुत्पूयततस्तत्पात्रंदक्षिणहस्तेनादायवामहस्तेधृत्वामूलेदक्षिणहस्तानामिकांगुष्ठाभ्यां
धृत्वेनपवित्रेणनासामयांत्रिरुदिंगनंकुर्यात् ततःप्रणीताजलेनपात्रस्थाःप्रोक्षणीरयोभिषिच्यताभिरद्भिःप्रोक्षणीभिर्यथासादितंवस्तु
आसादनक्रमेणसकृत्प्रोक्ष्यशेषजलसहितंतत्पात्रंप्रणीताग्न्योरंतरालेनिधाय आज्यस्थाल्यामाज्यंनिरुप्यचरुस्थाल्यांतंडुलान्प्र
क्षिप्यप्रणीतोदकेनत्रिःप्रक्षाल्यतत्रप्रणीतोदकंदुग्धंवाप्रक्षिप्यस्वयंचरुंब्रह्मणावाज्यंग्राहयित्वाप्रदक्षिणीकृत्याग्निपूर्वेणानीयदक्षिणतआ
ज्यमुत्तरतःपायसस्वरं अर्पणार्थंयुगपदग्नौनिधायज्वलदुल्मुकंहविर्दृष्योपरिप्रदक्षिणंभ्रामयित्वावह्नौक्षिप्त्वादक्षिणहस्तेनस्रुवमादाय
प्रागग्रमधोमुखंप्रतप्यउत्तानीकृत्यसंमार्जनकुशैरभ्यंतरतोग्राह्यमूलपर्यंतंमध्यैर्मध्यतःमूलैर्बाह्यतोमूलाद्युपर्यंतंस्रुवस्यसंमार्जनं प्र
णीताभिरभ्युक्षणंपुनःप्रतप्यतंस्तनवर्हिषःस्वपुरतोधारणं ततः पाकेवृतेस्वयमाज्यमुद्वास्याग्निपश्चिमेनानीयप्रणीतोत्तरतःप्रयमंतिधाय

चरुं तथैवोत्तरस्याज्यपश्चिमेनानीयाज्यस्योत्तरतो निधाय स्वपुरतः स्रुवोत्तरेऽग्नाज्यं तत्पुरतश्चरुं निधाय प्रोक्षणीतः पवित्रे समानी
याज्ये प्रोक्षणीवत्सवनं ततः पवित्रे प्रोक्षण्यां निधाय॥ आज्यमवेक्ष्य तस्य पद्ध्येतु न्निरस्य प्रोक्षण्युत्सवनं विधाय पापस्रुवरोरुत्तर
तः पूर्वसिद्धपिष्टकचरुं निधाय होमसमाप्तिपर्यंतमुपयमनकुशैर्वामकरेणोपग्रहं विधाय दक्षिणेनानामिकायां कुशत्रयं धृत्वा प्रजापतिं
चिंतयन्नवतिष्ठन् शागग्रसमिल्लपंघृताक्तं वह्नौ क्षिपेत् ततउपविश्य प्रोक्षण्युदकेन सह विध्मम् अग्निं पर्युक्ष्य पवित्रे निधाय प्रोक्षणीपात्रं
स्वस्थाने निदध्यात् ततो ब्रह्मणा करवर्हिषा दक्षिणवाहावन्वारब्धो दक्षिणं जानु नमयित्वा संस्रुवविनैवाज्येन जुहुयात् तथायाप्रज
मानस्तावद्वर्हिर्भिर्यजते होता मंत्रपठति यजमानो हविस्त्यजति इदं न ममेति ततो होता हविः प्रक्षिपति अत्रवापक्रमः होता मंत्रपाठे
न हविर्भागिन्यान्त्वनायां प्रकाशितायां तथैव मंत्रप्रकाशितं शाखिशिखरा घुपेतां तामुद्दिश्य यजमानो हविस्त्यजति इदं न ममेत्यादि
नामानसव्यापारेण ततो होता मंत्रपाठानुपदमेव स्वाहेति शब्दे न फलेनसतावह्नौ हविः प्रक्षिपति प्रत्याहुत्येवं एतावतैव यागो हो
मीभूतः ततोपस्मशाखायां इदं सूर्यपि साक्षिकमपि व्याक्रियते सत्यमाहरति अदृष्टार्थं स्वशाखानुरोधात् अतएव अग्नपरइति
त्यागइत्यादि यस्य दृतिलिखनं तच्छाखानुरोधेनादृष्टार्थमिसवगंतव्यं अन्यथा वेदचतुष्टुयेषु सत्स्वस्त्यागः स्यात् तस्य च नास्ति किंच याज
मानिकस्त्यागो मानसः स च प्रत्याहुति तेन मनसा क्रियत एव अस्ति स्त्यागे पापाग्मकेनाधिकारः अदृष्टत्वात् हविषि स्वत्वाभावात्

यत्रतुयजमानएवहोतातत्रमंत्रंस्वाहांतंपठित्वाइदममेतिमनसासंकल्पयमानोहविस्त्यजतिशेषंद्वैतनिर्णयेतद्रष्टव्यंप्रयोगः
ॐ इहरतिरित्याद्यानांचतुर्णांन्देवाऋषयोग्निर्देवतायजुश्छन्दःसिसन्नोत्थानेविनियोगः ॐ इहरतिस्वाहाइदमग्नये ॐ इहरमध्वं
स्वाहाइदमग्नये ॐ इहधृतिःस्वाहाइदमग्नये ॐ इहस्वधृतिःस्वाहाइदमग्नये उपसृजन्नितिद्वयोर्देवाऋषयउष्णिक्छन्दोग्निर्देवता
सन्नोत्थानेविनियोगः ॐ उपसृजन्धरुणंमात्रेधरुणोमातरंधयन्स्वाहाइदमग्नये। ॐ रायस्पोषमस्मासुदीधरत्स्वाहाइदमग्नये ततः
ससंस्रवंप्रागजस्रअग्नेर्दक्षिणभागेमनसा ॐ प्रजापतयेस्वाहा इदंप्रजापतयेइदमग्नेरुत्तरभागेप्रागृजु ॐ इन्द्राय ततउत्तरपूर्वार्द्धे ॐ
अग्नयेस्वाहाइदमग्नये दक्षिणपूर्वार्द्धे ॐ सोमायस्वाहाइदंसोमायइत्याघाराज्यभागौहुत्वा पापसंपिष्टकमर्कंचादायसमिद्धतमे
ग्नौसंस्रवंविनैवदक्षिणार्द्धेविदानभूतेनपापसेनजुहुयात् ॐ अग्नयेस्वाहा इदमग्नये ॐ रुद्रायस्वाहा इदंरुद्राय ॐ सर्वायस्वाहा
इदंसर्वाय ॐ पशुपतयेस्वाहा इदंपशुपतये उग्रायस्वाहाइदमुग्राय ॐ अशनयेस्वाहाइदमशनये ॐ भवायस्वाहाइदंभवाय ॐ म
हादेवाइदंमहादेवाय ॐ ईशानायस्वाहाइदमीशानाय इतिहुत्वादक्षिणार्द्धेविदानभूतेनपिष्टकेनजुहुयात् पूषागाइतिगोतमऋषिर्गा
यत्रीछन्दःपूषादेवतापिष्टहोमेविनियोगः ॐ पूषागाअन्वेतुनःपूषारक्षत्वर्वतःपूषावाजंसनोतुनःस्वाहाइदंपूष्णेततःपापसपिष्टका
मांसउत्तरार्द्धेविदानभूतान्मांससंस्रवं ॐ अग्नयेस्विष्टकृतेस्वाहाइदमग्नयेस्विष्टकृते ततोग्नेर्मध्यभागेआज्येन प्रजापतिऋषिर्गायत्रीछन्दो

पि॰त॰ अग्निर्देवताव्याहृतिहोमेविनियोगः ॐभूःस्वाहा इदंभूः प्रजापतिऋषिर्हस्निकछंदोवायुर्देवताव्याहृतिहोमेविनियोगः ॐभुवःस्वाहा
इदंभुवः प्रजापतिऋषिरनुष्टुपछंदः सवितादेवताव्याहृतिहोमेविनियोगः ॐस्वः।स्वाहा इदंस्वः त्वन्नोअग्नइतिवामदेवऋषिस्त्रिष्टुपछंदो
२३ 23 ग्नावरुणौदेवतेआज्यहोमेविनियोगः ॐत्वन्नोअग्नेवरुणस्यविद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांं
सिप्रमुमुग्ध्यस्मत्स्वाहा इदमग्नीवरुणाभ्यां सत्वन्नोअग्नइतिवामदेवऋषिस्त्रिष्टुपछंदोग्नीवरुणौदेवताआज्यहोमेविनियोगः ॐ
सत्वन्नोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्वनोवरुणंरराणोवीहिमृडीकंसुहवोनएधिस्वाहा इदमग्नीवरु
णाभ्यां अयाश्चाग्नइतिप्रजापतिऋषिः पंक्तिश्छंदोग्निर्देवताआज्यहोमेविनियोगः ॐअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्वमित्वमया
असि अयानोयज्ञंवहास्ययानोधेहिभेषजंस्वाहा इदमग्नये येतेशतमितिशुनःशेपऋषिस्त्रिष्टुपछंदोवरुणोदेवताआज्यहो
मेविनियोगः ॐयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशाविततामहांतः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतःस्वर्काःस्वाहा
इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः उदुत्तममितिशुनःशेपऋषिस्त्रिष्टुपछंदोग्निर्देवताआज्यहोमेविनियो
गः ॐउदुत्तमंवरुणपाशमस्मदवाधमंविमध्यमंश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहा इदंवरुणाय ततः
संस्रवमेव ॐप्रजापतयेस्वाहा इदंप्रजापतयइतिमनसा ततःसंस्रवप्राशनमाचमनंविधाय।पवित्राभ्यांशिरःसंमृज्यसुमित्रियानइतिप
२३

रमेष्ठीऋषिरापोदेवताशिरःसंमार्जनेविनियोगःॐसुमित्रियानआपओषधयःसंतुइतिमंत्रेण ततोदुर्मित्रियाइतियजुषःपरमे
ष्ठीऋषिरापोदेवताप्रणीतानिनयनेविनियोगःॐदुर्मित्रियास्तस्मैसंतुयोस्मान्द्वेष्टियंचवयंद्विष्मःइतिमंत्रेणततः प्रणीतोदकमै
शान्यांनिनयेत् ततःफलपुष्पान्वितघृतेनमूर्द्धानंदिवइतिभरद्वाजऋषिस्त्रिष्टुप्छन्दोविश्वेदेवादेवतापूर्णाहोमेविनियोगःॐमूर्द्धा
नंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निं कविंसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाःस्वाहा इदमग्नये इ
तिहोतायजमानसहितःपूर्णाहुतिंकुर्यात् ततस्तरणक्रमेणवर्हिस्त्वाप्याज्येनाभिघार्य देवागातुविद इति परमेष्ठीऋषिर्यजुर्वेदोदे
वतावर्हिर्होमेविनियोगःॐदेवागातुविदोगातुंवित्त्वागातुमित मनसस्पतइमंदेवयज्ञंस्वाहावातेधाःस्वाहाइदमग्नयेइति वर्हि
र्होमंकुर्यात् ततोयजमानःकुशाक्षतयवतिलजलान्यादाय ॐअद्यकर्तव्यवृषोत्सर्गांगभूतहोमकर्मणिकृतेनतत्कृताकृतावेक्षणरूपब्र
ह्मकर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायब्रह्मणे दक्षिणांतुभ्यमहंसंप्रददेइतिदक्षिणांदद्
यात् ॐस्वस्तीतिप्रतिवचनं ब्रह्मपरितोषंचकिंचिद्दद्यात् ततोवस्त्रयुगसुवर्णकांस्यान्युपनीय कुशाक्षतयवतिलजलान्यादाय ॐअद्य
कर्तव्यवृषोत्सर्गांगभूतकृतैतद्धोमकर्मप्रतिष्ठार्थमेतानिवस्त्रयुगसुवर्णकांस्यानिवृहस्पतिवह्निचन्द्रदेवतानिअमुकगोत्रायामुक
शर्मणेब्राह्मणायहोत्रेदक्षिणांतुभ्यमहंसंप्रददेइतिहोत्रेदक्षिणांदद्यात ॐस्वस्तीतिप्रतिवचनं ततोयजमानोदक्षिणानामिकाधृतसुवर्ण

रजतकुशान्नपपवित्रकः रुद्रान्जपेत् तद्यथा रुद्राध्यायस्य परमेष्ठी ऋषिर्नमस्त इति गायत्री छन्दो पातेयामिषं शिवेन वचसेति तिसृणा
मनुष्टुप् छन्दो ध्यवोचदसौ यो यो सौ प इति तिसृणां पंक्तिश्छन्दो नमो तिसाम्नं नमस्त इसंतंस प्रानाना मनुष्टुप्छन्दो मामस इति द्वितपस्य कुत्स ऋ
षिर्जगती छन्दः एकरुद्रो देवता नमो हिरण्यबाहव इत्यादीनि यजूंषि बृहद्रुद्रो देवता निदाये अंधस इत्युपरिष्टाद्बृहती छन्दः इमा रुद्रायेति
कुत्स ऋषिर्जगती छन्दोपात इत्यनुष्टुप्छन्दः परि णो मीढुष्टम इति त्रिष्टुप्छन्दो विकिरिद्र विलोहित सहस्राणि सहस्रश इत्यानुष्टुप्छ
न्दो असंख्याता इत्यादि द्रुद्राणामनुष्टुप्छन्दो बहुरुद्रो देवता नमोस्त्विति तिस्रीणि यजूंषि बृहद्रुद्रो देवता निजपे विनियोगः ॐ नमस्ते रु
द्र मन्यव उतो त इषवे नमः बाहुभ्यामुत ते नमः १ या ते रुद्र शिवा तनूरघोरापापकाशिनी तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि
२ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ३ शिवेन वचसा त्वा गिरिशाच्छा वदामसि यथा नः सर्व
मिज्जगदयक्ष्मं सुमना असत् ४ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यो धराचीः परासु
व ५ असौ यस्ताम्रो अरुण उत बभ्रुः सुमंगलः ये चैन ४ रुद्रा अभितो दिक्षु श्रिताः सहस्रशो वैषा ४ हेड ईमहे ६ असौ योवसर्पति नी
लग्रीवो विलोहितः उतैनङ्गोपा अदृश्रन्न दृश्रन्नुदहार्यः स दृष्टो मृडयाति नः ७ नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे अथो ये अस्य
सत्वानो हं तेभ्यो करं नमः ८ प्रमुञ्च धन्वनस्त्वमुभयोरार्त्न्योर्ज्याम् याश्च ते हस्त इषवः परा ता भगवो वप ९ विज्यं धनुः कपर्दिनो विशल्यो

वाणवारें।।उतअनेशन्नस्यपाइषवःआभुरस्यनिषङ्गधिः १० पातेहेतिर्मीढुष्टमहस्तेवभूवतेधनुः तयास्मान्विश्वतस्त्वमपक्ष्मयाप
रिभुज ११ परितेधन्वनोहेतिरस्मान्वृणक्तुविश्वतःअथोपइषुधिस्तवारेअस्मन्निधेहितम् १२ अवतत्यधनुष्ट्वं सहस्राक्षशते
षुधे निशीर्य्यशल्यानांमुखाशिवोनःसुमनाभव १३ नमस्तआयुधायानाततायधृष्णवे उभाभ्यामुतजेनमोवाहुभ्यांतवधन्व
ने १४ मानोमहान्तमुतमानोअर्भकंमानउक्षन्तमुतमानउक्षितंमानोवधीःपितरम्मोतमातरम्मानःप्रियास्तन्वोरुद्ररीरिषः १५
मानस्तोकेतनयेमानआयुषिमानोगोषुमानोअश्वेषुरीरिषःमानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्वाहवामहे १६ नमो
हिरण्यवाहवेसेनान्येदिशांचपतयेनमोनमोवृक्षेभ्योहरिकेशेभ्यःपशूनां।पतयेनमोनमःशष्पिंजरायत्विषीमतेपथीनांपतये
नमोनमोहरिकेशायोपवीतिनेपुष्टानांपतयेनमो १७ नमोवभ्लुशायव्याधिनेन्नानांपतयेनमोनमोभवस्यहेत्यैजगतांपतयेनमो
नमोरुद्रायाततायिनेक्षेत्राणांपतयेनमोनमःसूतायाहंत्यैवनानांपतयेनमो १८ नमोरोहितायस्थपतयेवृक्षाणांपतयेनमोन
मोभुवंतयेवारिवस्कृतायौषधीनांपतयेनमोनमोमंत्रिणेवाणिजायकक्षाणांपतयेनमोनमःउच्चैर्घोषायाक्रन्दयतेपत्तीनांपतये
नमो १९ नमःकृत्स्नायतयाधावतेसत्वनांपतयेनमोनमःसहमानायनिव्याधिनआव्याधिनीनांपतयेनमोनमोनिषंगिणेक
कुभायस्तेनानाम्पतयेनमोनमोनिचेरवेपरिचरायारण्यानांपतयेनमो २० नमोवंचतेपरिवंचतेस्तायूनांपतयेनमोनमोनिषङ्गि

पित०

णइषुधिमतेतस्कराणांपतयेनमोनमःसृकायिभ्योजिघांसद्भ्योमुष्णतांपतयेनमोनमोसिमद्भ्योनक्तंचरद्भ्योविकृंतानांपत
येनमोनमः २१ नमउष्णीषिणेगिरिचरायकुलुंचानांपतयेनमोनमइषुमद्भ्योधन्वायिभ्यश्चवोनमोनमआतन्वानेभ्यःप्रतिद
२५ धानेभ्यश्चवोनमोनमआयच्छद्भ्योस्यद्भ्यश्चवोनमो २२ नमोविसृजद्भ्योविध्यद्भ्यश्चवोनमोनमःस्वपद्भ्योजाग्रद्भ्यश्चवोनमोन
25 मःशयानेभ्यआसीनेभ्यश्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमो २३ नमःसभाभ्यःसभापतिभ्यश्चवोनमोनमोश्वेभ्योश्वप
तिभ्यश्चवोनमोनमआव्याधिनीभ्योविविध्यंतीभ्यश्चवोनमोनमउगणाभ्यस्तृंहतीभ्यश्चवोनमो २४ नमोगणेभ्योगणपतिभ्य
श्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमो २५ न
मोसेनाभ्यःसेनानिभ्यश्चवोनमोनमोरथिभ्योअरथेभ्यश्चवोनमोनमःक्षत्तृभ्यःसंग्रहीतृभ्यश्चवोनमोनमोमहद्भ्योअर्भकेभ्यश्च
वोनमः २६ नमस्तक्षभ्योरथकारेभ्यश्चवोनमोनमःकुलालेभ्यःकर्मारेभ्यश्चवोनमोनमोनिषादेभ्यःपुंजिष्ठेभ्यश्चवोनमोनमःश्वनि
भ्योमृगयुभ्यश्चवोनमो २७ नमःश्वभ्यःश्वपतिभ्यश्चवोनमोनमोभवायचरुद्रायचनमःशर्वायचपशुपतयेचनमोनीलग्रीवायच
शितिकंठायच २८ नमःकपर्दिनेचव्युप्तकेशायचनमःसहस्राक्षायचशतधन्वनेचनमोगिरिशयायचशिपिविष्टायचनमोमीढुष्ट
मायचेषुमतेच २९ नमोह्रस्वायचवामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धायचसवृधेचनमोग्र्यायचप्रथमायच ३० नमआशवेचा

जिराय च नमः शीघ्र्याय च शीभ्याय च नम ऊर्म्याय चावस्वन्याय च नमो नादेयाय च द्वीप्याय च ३१ नमो ज्येष्ठाय च कनिष्ठाय च नमः पूर्वजा
य चापरजाय च नमो मध्यमाय चापगल्भाय च नमो जघन्याय च बुध्न्याय च ३२ नमः सोभ्याय च प्रतिसर्याय च नमो याम्याय च क्षेम्याय च न
मः श्लोक्याय चावसान्याय च नम उर्वर्याय च खल्याय च ३३ नमो वन्याय च कक्ष्याय च नमः श्रवाय च प्रतिश्रवाय च नम आशुषेणाय चाशु
रथाय च नमः शूराय चावभेदिने च ३४ नमो बिल्मिने च कवचिने च नमो वर्मिणे च वरूथिने च नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय चा
हनन्याय च ३५ नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च ३६ नमः स्रु
त्याय च पथ्याय च नमः काट्याय च नीप्याय च नमः कुल्याय च सरस्याय च नमो नादेयाय च वैशन्ताय च ३७ नमः कूप्याय चावट्याय च नमो
वीध्र्याय चातप्याय च नमो मेघ्याय च विद्युत्याय च नमो वर्ष्याय चावर्ष्याय च ३८ नमो वात्याय च रेष्म्याय च नमो वास्तव्याय च वास्तुपाय
च नमः सोमाय च रुद्राय च नमस्ताम्राय चारुणाय च ३९ नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च नमो ग्रेवधाय च दूरेवधाय च
नमो हन्त्रे च हनीयसे च नमो वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय ४० नमः शम्भवाय च मयोभवाय च नमः शङ्कराय च मयस्कराय च नमः
शिवाय च शिवतराय च ४१ नमः पार्याय चावार्याय च नमः प्रतरणाय चोत्तरणाय च नमस्तीर्थ्याय च कूल्याय च नमः शष्प्याय च फेन्याय
च ४२ नमः सिकत्याय च प्रवाह्याय च नमः किंशिलाय च क्षयणाय च नमः कपर्दिने च पुलस्तये च नम इरिण्याय च प्रपथ्याय च ४३ नमो

ऊर्म्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्याय च नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च ४४ नमः शुष्क्याय च
हरित्याय च नमः पांसव्याय च रजस्याय च नमो लोप्याय चोलप्याय च नम ऊर्व्याय च सूर्व्याय च ४५ नमः पर्ण्याय च पर्णशद्या
य च नमः उद्गुरमाणाय चाभिघ्नते च नम आखिदते च प्रखिदते च नम इषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमो नमो वः किरिकेभ्यो देवानां
हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः ४६ द्रापे अन्धसस्पते दरिद्रन्नीललोहित। आसां प्रजानामे
षां पशूनां मा भेर्मा रो मो च नः किंचनाममत् ४७ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः। यथा समसद्द्विपदे
चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरं ४८ या ते रुद्र शिवा तनूः शिवा विश्वाहा भेषजी। शिवा रुतस्य भेषजी तया नो मृड जीव
से ४९ परि णो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः। अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृड ५० मी
ढुष्टम शिवतम शिवो नः सुमना भव। परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ५१ विकिरिद्र विलो
हित नमस्ते अस्तु भगवः। यास्ते सहस्रं हेतयोऽन्यमस्मन्निवपन्तु ताः ५२ सहस्राणि सहस्रशो बाह्वोस्तव हेतयः। तासामीशा
नो भगवः पराचीना मुखा कृधि ५३ असंख्याता सहस्राणि ये रुद्रा अधि भूम्यां। तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ५४ अ
स्मिन्महत्यर्णवेऽन्तरिक्षे भवा अधि। तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ५५ नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपश्रिताः। नील

२६

ग्रीवाः शितिकंठाः सर्वा अधः क्षमाचराः तेषाᳪं सहस्रयोजनेव धन्वानि तन्मसि ५७ ये वृक्षेषु शष्पिञ्जरा नीलग्रीवा विलोहि
ताः तेषाᳪं सहस्रयोजनेव ध न्वानि तन्मसि ५८ ये भूतानामधिपतयो विशिखासः कपर्दिनः तेषाᳪं सहस्रयोजनेव धन्वानि तन्म
सि ५९ ये पथां पथिरक्षय ऐलबृदा आयुर्युधः तेषाᳪं सहस्रयोजनेव धन्वानि तन्मसि ६० ये तीर्थानि प्रचरंति सृकाहस्ता निषंगि
णः तेषाᳪं सहस्रयोजनेव धन्वानि तन्मसि ६१ येन्नेषु विविध्यंति पात्रेषु पिबतो जनान् तेषाᳪं सहस्रयोजनेव धन्वानि तन्मसि
६२ य एतावंतश्च भूयांसश्च दिशो रुद्रा वितस्थिरे तेषाᳪं सहस्रयोजनेव धन्वानि तन्मसि ६३ नमोस्तु रुद्रेभ्यो ये दिवि येषां व
र्षमिषवः तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्यो नमो अस्तु ते नो वन्तु ते नो मृडयंतु ते यं द्विष्मो यश्च नो द्वे
ष्टि तमेषां जंभे दध्मः ६४ नमोस्तु रुद्रेभ्यो येंतरिक्षे येषां वात इषवः तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः ते
भ्यो नमो अस्तु ते नो वंतु ते नो मृडयंतु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जंभे दध्मः ६५ नमस्तु रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः
तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः तेभ्यो नमो अस्तु ते नो वंतु ते नो मृडयंतु ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जं
भे दध्मः ६६ ततो वृषभमंकयेसपस्कारं ब्रूयात् स च दक्षिणहस्तमूले वह्निस्वस्तिकेण वामहस्तमूले वहिःत्रिशूलेन वृषभमंकयेत्
ततः सर्ववत्सतरीमध्यस्थं वृषं कुशोदकेन यजमानः प्रतिमंत्रांतं स्नपयेत् तत्र करणमंत्राः हिरण्यवर्ण इति अनुवाकचतुष्टयस्याग्निऋषि

स्त्रिष्टुप् छंदः आपोदेवतास्नपनेविनियोगः ॐ हिरण्यवर्णाः शुचयःपावकायासुजातःकश्यपोयास्विन्द्रः याअग्निंगर्भंदधिरेसुवर्णा
स्तानआपःशंस्योनाभवंतु ॐ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यन्जनानां याअग्निंगर्भंदधिरेसुवर्णास्तानआपः
शंस्योनाभवंतु ॐ यासांदेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति याअग्निंगर्भंदधिरेसुवर्णास्तानआपःशंस्योनाभ
वंतु ॐ शिवेनमाचक्षुषापश्यतापःशिवयातन्वोपस्पृशतत्वचंमे घृतश्चुतःशुचयोयाःपावकास्तानआपःशंस्योनाभवंतु ॐ शन्नो
देवीरितिदध्यंगाथर्वणऋषिर्गायत्रीछंदःआपोदेवतास्नपनेविनियोगः ॐ शन्नोदेवीरभिष्टयआपोभवंतुपीतये शंय्योरभिस्रवंतुनः इति
ततोलोहघंटानूपुरकपर्दिकाभिर्वषंवत्सतरीमलंकुर्यात् गायत्र्याविश्वामित्रऋषिर्गायत्रीछंदःसवितादेवतातपेविनियोगः गायत्रीअ
घमर्षणसूक्तस्याघमर्षणऋषिरनुष्टुप्छंदोभाववृत्तोअश्वमेधावभृथेविनियोगः ॐ ऋतंचसत्यंचाभीद्धात्तपसोध्यजायत ततोरात्र्य
जायतततःसमुद्रोअर्णवः समुद्रादर्णवादधिसंवत्सरोअजायत अहोरात्राणिविदधद्विश्वस्यमिषतोवशी सूर्याचंद्रमसौधातायथापूर्व
मकल्पयत् दिवंचपृथिवींचांतरिक्षमथोस्वः पुनरपितत्राध्यायंजपित्वा सहस्रशीर्षेतिषोडशर्चस्यपुरुषोनारायणऋषिः पंचदशानुष्टुभो
न्त्यात्रिष्टुप्नारायणोदेवताजपेविनियोगः ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् सभूमिंसर्वत।स्पृत्वात्यतिष्ठद्दशांगुलं यदन्नेनातिरोह
ति २ एतावानस्यमहिमातोज्यायांश्चपूरुषः पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ३ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनः ततोविष्वङ्व्यक्रामत्साश

नानशने अभि ४ ततोविराडजायतविराजोअधिपूरुषः सजातोअत्यरिच्यतेपश्चाद्भूमिमथोपुरः ५ तस्माद्यज्ञात्सर्वहुतः संभृतंपृ
षदाज्यंपशूंस्तांश्चक्रेवायव्यानारण्याग्राम्याश्चये तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे छंदांसिजज्ञिरेतस्माद्यजुस्तस्माद
जायत ७ तस्मादश्वाअजायंतयेकेचोभयादतः गावोहजज्ञिरेतस्मात्तस्माज्जाताअजावयः ८ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजात
मग्रतः तेनदेवाअयजंतसाध्याऋषयश्चये ९ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् मुखंकिमस्यासीत्किंबाहूकिमूरूपादाउच्येते १०
ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ऊरूतदस्ययद्वैश्यःपद्भ्यांशूद्रोअजायत ११ चन्द्रमामनसोजातश्चक्षोःसूर्योअजाय
त श्रोत्राद्वायुश्चप्राणश्चमुखादग्निरजायत १२ नाभ्याआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकाँ
अकल्पयन् १३ यत्पुरुषेणहविषादेवायज्ञमतन्वत वसंतोस्यासीदाज्यंग्रीष्मइध्मःशरद्धविः १४ सप्तास्यासन्परिधयस्त्रिःसप्तस
मिधःकृताः देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुं १५ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् तेहनाकंमहिमानःस
चंतयत्रपूर्वेसाध्याःसंतिदेवाः १६ यद्वादेवहेडनमितिमंत्रस्यप्रजापतिर्ऋषिरनुष्टुप्छन्दोग्निर्वायुःसूर्योदेवताजपेविनियोगः
ॐ यद्देवादेवहेडनंदेवासश्चकृमावयं अग्निर्मातस्मादेनसोविश्वान्मुंचत्वंहसः यदिदिवायदिनक्तमेनांसिचकृमावयंवायुर्मात
स्मादेनसोविश्वान्मुंचत्वंहसः यदिजाग्रद्यदिस्वप्नएनांसिचकृमावयं सूर्योमातस्मादेनसोविश्वान्मुंचत्वंहसः ततोरषोभस्य

पित॰ दक्षिणकर्णेजपेत् पितावत्सानामिति प्रजापतिऋषिः पंक्तिश्छन्दो वृषो देवता जपे विनियोगः ॐ पितावत्सानां पतिरघ्न्यानामथो पिता
महतीं गर्गराणां वत्सा जरायुः प्रतिधुक् पीयूषा आमिक्षा घृतं तद्वस्य रेतः ॐ वृषो हि भगवान्धर्मश्चतुष्पादः प्रकीर्तितः वृणोमि तमहं
२८ भक्त्या स मां रक्षतु सर्वतः इति मन्त्रद्वयं ततः कुशान्वय तिलजलान्यादाय एवं युवानं पतिमिति याज्ञवल्क्य ऋषिः त्रिष्टुप्छन्दो गावो देवता वृषोत्स
28 र्गे विनियोगः अद्याशौचान्तद्वितीयेह्नि अमुकगोत्रस्य पितुरमुकशर्मणः प्रेतस्य प्रेतत्वलोकविमुक्तिस्वर्गलोकप्राप्तिकामोऽहं दैवतं वृषमेतं
युवानं पतिं वो ददानि तेन क्रीडंतीश्चरथ प्रियेण मा नः साप्त जनुषा सुभगा रायस्पोषेण समिषा मदेम अत्रार्थस्तु हे वत्सतर्यो वो युष्मा
कमेतं पतिं स्वामिनं युवानं तरुणं ददानि सृजामि तेनैतेन वृषेण प्रियेण सह क्रीडंतीः खेलंत्यश्चरथ अन्यच्च हे वत्सतर्यो यूयमपि मा नः
तास्माकं न नाशमत्स्वत्वविषयाः किंतु मया सक्ताः वयं वृषभस्य भवतीनां च साम्येन रायस्पोषेण धनसमृद्ध्या साप्त जनुषा सप्तजन्म
व्यापकेन हर्षा अन्नेन च सम्मदेम हृष्टा भवेम सुभगाः लोकस्य प्रिया इति तत ऐशानीं दिशं पंचापि चालयेत् पूजयेच्च तत्क्रमः मृदोधिः
ॐ वत्सतरीचतुष्टयसहितः वृषाय नमः इदमनुलेपनं। ॐ वत्सतरीचतुष्टयसहितवृषायनमः परिवस्त्रं तत्र दातव्यं प्रयोगः
ततः पुष्पैः ॐ वत्सतरीचतुष्टयसहितवृषायनमः इतत एष धूपः एष दीपः एतानि तांबूलानि एतानि नैवेद्यानि ॐ वत्सतरीचतुष्टयसहित
वृषायनमः इति दद्यात् ततो वत्सतरीचतुष्टयमध्यगतं वृषममिमंत्रयेत् तद्यथा मयोभूरित्यादियजुषा अन्वेवाष्ट ऋषयो वा पुरुर्देवता त्वत्र

२८

यस्य देवा ऋषयो ऽनुष्टुप्छंदो ऽग्निर्देवता तन्त्रापानीसस्याः शुनःशेफ ऋषिस्त्रिष्टुप्छन्दो देवतातन्त्रापानीस्य वरुणो देवता स्वर्ण
घर्मस्य साहितीनां पंचानां यजुषां देवा ऋषयो ऽग्निर्देवता वस्त्रान्तरीमध्यस्य वर्षाभिमंत्रणे विनियोगः ॐ मयोभूरभिवाहि स्वाहा मरुतो
स्मि मरुतां गणः शं भूर्मयोभूरभिमानाहि स्वाहा वस्यूरसि दुरस्वां छं भूर्मयोभूरभिमावाहि स्वाहा यास्ते अग्ने सूर्ये रुचो दिवमात
न्वन्ति रश्मिभिः ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः इन्द्राग्नी ताभिः सर्वाभी रुचं नो धत्त बृह
स्पते रुचं नो धेहि ब्राह्मणेषु रुचं राजसु नस्कृधि रुचं विश्वेषु शूद्रेषु मयि धेहि रुचा रुचं ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमा
नो हविर्भिः अहेडमानो वरुणेह बोध्युरुशंसः ऽसपान आपः प्रयोषीः स्वर्णधर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्योतिः स्वाहा
स्वर्णसूर्यः स्वाहा ततः कृताय सव्यो दक्षिणामुखो वामजानु नमयित्वा शुक्लवासा दक्षिणाग्रकुशान्त्र योपरि यवतिलवर्षपुष्पयोः टकाटीन्या
दाया ताम्रपात्राद्दिनाम नरस्य फलमुद्दिश्यांजलित्रयेण तर्पयेदनेन मंत्रेण ॐ स्वधा पितृभ्यो मातृभ्यो बंधुभ्यश्चापि तृप्तये मातृपक्षाश्च
ये केचित् ये चान्ये पितृपक्षजाः गुरुश्वशुरबंधूनां ये कुलेषु समुद्भवाः ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः वृषोत्सर्गेण ते सर्वे लभंतां प्रीति
मुत्तमां इति ततश्च कर्मकारमाहूयाभिमतेवै तनं तस्मै दद्यात् ततो वृषाब्राह्मणान् श्रावयेत् यलिंकिंचिद्द्विजन्मतमयोत्सृष्टं तस्मात्तन पतेत् न
वाहं नन तु सीरं पातव्यं केनचित्क्वचित् ततो ऽध्यायं पठित्वा हुतसर्पिष्कं पायसं ब्राह्मणान् भोजयेत् अथ कपिलादानं ॐ सोपकरणकपिलगव्यै नमः ३ ॐ

ब्राह्मणाय नमः ३ इति संपूज्य ॐ इमां सोपकरणां सवत्सां कपिलां गां ददामीति द्विजकरे जलदानं ॐ ददस्वेति प्रतिवचनं कुशात्रयस
हितेन जलेन कपिलामभिषिच्य कुशादीन्यादाय ॐ अद्याशौचांतद्वितीयेन्हि अमुकगोत्रस्य पितुरमुकशर्मप्रेतस्य स्वर्गकामः इमां क
पिलां गां हेमशृंगीं रूप्यखुरां वस्त्रयुगच्छन्नां कांस्योपदोहां मुक्तालांगूलभूषितां सवत्सां रुद्रदैवताममुकगोत्रायामुकशर्मणे ब्राह्मणाय
तुभ्यमहं संप्रददे इति दद्यात् ॐ स्वस्तीति प्रतिवचनं ततो दक्षिणाद्रव्यादिकमादाय ॐ अद्य कृतैतन्नु सोपकरणसवत्सकपिलगोदा
नप्रतिष्ठार्थमिदं हिरण्यमाग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ततः प्रतिग्र
हीता ॐ स्वस्तीत्युक्त्वा सव्येन दक्षिणहस्तेन गोपुच्छग्रहणं कामस्तुतिं च कुर्यात् तत्र मन्त्रद्वयं द्वितीयानां ॐ को दात् कस्मा अदात् कामो
दात् कामायादात् कामो दाता कामः प्रतिग्रहीता कामैतत्ते सामवेदे तु ॐ क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रति
ग्रहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते एतदुभयोक्तकपिलायाः फलमेकेवलापिसादस्येतितन्न काम्ये हि विशेषणा
सिद्धेर्लाभसिद्धेः तिर्यगधिकरणे विधानात् कथं तर्हि प्रेतषोडशपांक्त्याद्दियब्राह्मणाघभावे पिफलसिद्धिः तस्याश्चावश्यकत्वात् तथैव सर्व
शक्ताव्रभिधानादिति ततो महानघाशौचे सचैलं स्नात्वा तीर्थानि मनसा ध्यात्वा तज्जलेनास्नानमभ्युक्ष्य उत्तरे दिति सद्यः शौचे तु शय्यादि दाने
ॐ अद्याशौचांत इत्येव प्रयोगः कर्तव्यः अशौचव्यपगम इति विष्णुसूत्रात् अघाशौचांतद्वितीये न्हि सस्पंसंपूर्णशौचेन्यापप्रासनुवास्तात्

अथाघश्राद्धप्रयोगमध्याह्ने पाकस्यानंवेष्टयित्वा छागानुबंधयेत् श्राद्धभूमिं पंचगव्येनोपलिप्य ज्वलदंगारैः संशोध्य गोरमृत्तिकया पाठा
घतिलैः सर्षपैश्च विकिरेत् स्वयं पत्न्यमिवाप्य चेत् ततः प्राकेष्टते गृहं प्रविश्योपविश्य दक्षिणामुखः पादौ प्रक्षाल्य प्राङ्मुखउदङ्मुखो वा ऐ
शान्याभिमुखो वा हस्तौ प्रक्षाल्य विनुलुकत्रयं पात्रात्मतीर्थेनाचम्य श्रोत्रं वस्त्रेण कृत्वा पुनस्तथैव श्रोत्रं वस्त्रेणांतमाचमनं कृत्वा प्राङ्मुखः सिद्धमिति
मात्विकां घृष्ट्वा तिलतैलेन श्राद्धापवर्गस्थापिनं दीपं पित्रासनवामदलाशास्त्वचक्रधरं द्विभुजं पीतवाससं पुंडरीकाक्षं स्मरेत् शंखचक्रधरं वि
ष्णुं द्विभुजं पीतवाससं प्रारंभे कर्मणां विप्रः पुंडरीकं स्मरेद्धरिमिति विधेः अपवित्रः पवित्रो वेति अनुवादश्च एवं च विध्यनुवादैकवाक्य
तया पुंडरीकाक्षस्मरणविषयके कार्यस्मिं तत्र हि शुद्धिकामाधिकारिकेऽवगते स्मरणविधौ पुंडरीकाक्षस्मरणक्रियया पापप्रविसितनाप्रोक्षित
मित्यादिवाक्येन यत् श्राद्धीपदृश्य प्रोक्षणं विहितं तत्तु मित्रकर्मतिन प्रोक्षणेन पुंडरीकाक्षस्मरणात्वपश्यति निगलितं कुशत्रयजलेन श्राद्धीपद्र
व्याणि प्रोक्ष्य कुशत्रयतिलजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मप्रेतस्य प्रेतत्वकामोघादि यथाकालं षोडशश्राद्धान्यहं करिष्ये इ
ति संकल्प्य कुशत्रयं भूमौ त्यजेत् एकादशमासाभ्यंतरे धिमासयाते षोडशस्थाने सप्तदशमसस्य प्रयोजनीयं ततः पुनः कुशत्रयतिलजलान्या
दाय ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मप्रेतस्य प्रेतत्वविमुक्तिहेतुषोडशश्राद्धांतर्गताघश्राद्धमहं करिष्ये इति संकल्प्य परकीयभूमौ श्राद्धक
रणपक्षे भूस्वामिपितृभ्यः श्राद्धीपात्रगभागं पितृरीत्या दद्यात् नवघटानीन्यानेष्यन्नं गव्यकाय अपविश्य जपेद्दीमानुगायत्रीं तदनुजपेति वा सवलेन

गायत्रीजपस्यैव श्राद्धप्रयोगप्रथमकर्मकत्वात् सेकस्य च श्राद्धपूर्वसमयमात्रकर्तव्यत्वात् संकल्पस्य च शिष्टाचारमात्रमूलकत्वा
दिति सेकसंकल्पयोस्तु पाठक्रमः पंक्षस्त्वनुक्तो तिवत् श्रीसत्यायाध्यायपद्धतौ सोऽप्येवं ततः सव्येन जपधर्मेण त्रिर्गायत्रीं देवताभ्यश्च
त्रिर्जपेत् ततो दक्षिणामुखः प्राचीनावीती पातितवामजानुः ॐ अद्यामुकगोत्र पितरमुकशर्मप्रेत इदं मासनं नमया दीयते तवोपतिष्ठता
मिति मोटकरूपमासनं दद्यात् ततः सव्येन दानधर्मेण ॐ छत्रायनमः ३ ॐ ब्राह्मणायनमः ३ ॐ इदं छत्रं ददानीति द्विजकरे जलदानं ॐ दद
स्वेति प्रतिवचनं छत्रमभिषिच्य कुशान्त्रयं तिलजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकशर्मप्रेतस्यावरणकामः इदं छत्रममुतानां गिरो
दैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति ब्राह्मणकरमध्ये दद्यात् ॐ स्वस्तीति प्रतिवचनं ततो दक्षिणां द्रव्यादिक
मादाय ॐ अद्य कृतैतच्छत्रदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतं तममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दद्या
त् ततः प्रतिग्रहीता ॐ स्वस्तीत्युक्त्वा सदक्षिणेन दक्षिणहस्तेन छत्रं दंडे धारयेत् ततः ॐ उपानद्भ्यां नमः ३ ॐ ब्राह्मणायनमः ३ ॐ इमे उपा
नहौ ददानीति द्विजकरे जलदानं ॐ ददस्वेति प्रतिवचनं उपानहावभिषिच्य कुशान्त्रयतिलजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकशर्म
प्रेतस्य तप्तवालुकासिकंटकितभूदुर्गसंतरणकामः इमे उपानहावनुसानां गिरो दैवते अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे
इति पूर्वरीत्या दद्यात् ॐ स्वस्तीति प्रतिवचनं ततो दक्षिणां द्रव्यादिकमादाय ॐ अद्य कृतैतदुपानद्दानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवत

ममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणांतुभ्यमहंसंप्रददेइतिदद्यात् ततःप्रतिगृहीतास्वस्तीत्युक्त्वाउपानहावारोहेत् ततोपसव्यं
कृत्वादक्षिणामुखोयजमानपातितवामजानुः ॐ अपहताअसुरारक्षांसिवेदिषदइतिश्राद्धदेशेवामावर्त्तेनतिलान् विकीर्यततो
जपेतिकर्त्तव्यतपाकृत्वापसव्यएव ॐ आयंतुनःपितरःसोम्यासोग्निष्वात्ताःपथिभिर्देवयानैः अस्मिन्यज्ञेस्वधयामदंतोधिब्रुवंतुतेवंत्व
स्मान् इतिजपेत् ततोदक्षिणहस्तान्कुशत्रयमयसाप्या ततोर्घपात्रोपरिस्थनखाछिन्नंपवित्रंदक्षिणाग्रंधृत्वा ॐ शन्नोदेवीरभिष्टयआ
पोभवंतुपीतये शंयोरभिस्रवंतुनः इतिमंत्रेणार्घपात्रेजलंदत्वा ॐ तिलोसिसोमदेवत्योगोसवोदेवनिर्मितः प्रत्नमद्भिःपृक्तःस्वधयापि
तृल्लोकान्प्रीणाहिनःस्वाहेतितिलान्प्रक्षिप्यगंधंततःपुष्पाणितूष्णींतत्रप्रक्षिप्यअर्घपात्रंवामहस्तेकृत्वापवित्रंपात्रेउत्तराग्रंधृत्वा
तदुपरिकिंचिदुदकांतरंदत्वा ॐ यादिव्याआपःपयसासंबभूवुर्याअंतरिक्षाउतपार्थिवीर्याः हिरण्यवर्णायज्ञियास्तानआपःशिवासशं
स्योनाःसुहवाभवंतु इतिपठित्वामोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन्प्रेतएषोर्घस्तेमयादीयतेतवोपतिष्ठतामितिपात्रे
पवित्रोपरिअर्घजलंदद्यादुत्सृजेत् पात्रंवामपार्श्वे ॐ पितृस्थानमसीत्यर्घपात्रंसपवित्रंअधोमुखंस्थापयेत् तच्चदक्षिणादानपर्यंतंन
चालयेत् ततःश्राद्धदेशेतिलान्विकीर्यदर्भहस्तोभूतलेप्रेतमाह्वयेत् तत्रमंत्रः ॐ इहलोकंपरित्यज्यगतोसिपरमांगतिमितिअत्रत्वा
श्राद्धेपिगतोसीसेपठनीयं प्रेतमात्रस्यतुल्यत्वद्रूपस्यैतावृहासंभवात् ततोमोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकशर्मन्प्रेतएत

निगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसितेमयादीयंतेनवोपतिष्ठंतामितिगंधादीन्मुत्सृजेत् ततः प्रेतोपभुक्तंशय्यासनादिकंगंध
पुष्पैरभ्यर्च्यश्रोत्रियेब्राह्मणायप्रतिपादयेत् ततोगोमयेनकृपाणीवास्त्रूएंनजलेनवाप्राङ्हाणावेष्टितंचतुरस्रंमंडलंकुर्यात् ततउस्मिन्ने
ताम्रादिपात्रेणकराभ्यामादायमनाकस्थितापितरंध्यात्वापुरुषत्वनिस्समंवामान्वारब्धदक्षिणहस्तेनपरिवेषयेत् एवंवात्रोपनपोह
स्ताभ्याममन्नदानंतुवामान्वारब्धदक्षिणहस्तेननत्वेकहस्तेन एकेनपाणिनादत्तंनकरग्बनभक्षयेत् घृतंतैलंचलवणंपानीयगोरसंतथा
इतिवचनात् केवलहस्तेननदेयमंततःपात्रादिनापिदेयमाक्षिकंफाणितंशाकंगोरसंलवणंतथा हस्तदत्तानिभुक्त्वातुभोक्तासांतपनं
चरेत् इतिवचनात् ततइदंमधुरमिदमम्लमित्यादिव्यंजनगुणानुकीर्तयन् मांसादीनिव्यंजनादीनिभूपिष्टपात्रांतरेषुपरिविष्यघृतंस
तिलतंलंचोपनीयान्नंमधुनाभिधायरेत् ॐमधुवाताऋतायतेमधुक्षरन्तिसिंधवः माध्वीर्नःसन्त्वोषधीः मधुनक्तमुतोषसोमधुमत्पार्थि
वंरजः मधुद्यौरस्तुनःपितामधुमान्नोवनस्पतिर्मधुमाँ२ऽअस्तुसूर्यः माध्वीर्गावोभवन्तुनः इतिपठित्वाप्य
स्वानुनानपाणिभ्याममन्नमालभ्य ॐपृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेअमृतेअमृतंजुहोमिस्वाहा इतिजपेत् ॐइदंवि
ष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपांसुरे इतिपठन्नन्नतरुपतपात्रेविनिवेश ॐकृष्णकव्यमिदंरक्षमदीयमितिपठित्वा ॐइद
मन्नं ॐ मा आपः ॐ इदंहविरिति अंगुष्ठमन्नजलघृतेषुनिवेश्य ॐ अपहताअसुरारक्षांसिवेदिषद इतिइमांसं अन्नोपरितिलान्

विकार्यमोरकाग्निपारायवामेनपाणिनापात्रमसृजत् ॐ अद्यामुकगोत्रपितरमुकशर्म्मन्नेतदिदमन्नंसोपकरणंतेमयादत्तयेततवो
पतिष्ठतामित्यन्नमुत्सृजेत् ततोदक्षिणानामिकायांसुवर्णरजतकुशान्यवान्सव्याहृतिकांगायत्रींमधुवाताइत्यादिमन्त्रंमधुमधु
मध्वितिचजपित्वा ॐ अन्नहीनंक्रियाहीनंविधिहीनंचयद्भवेत् तत्सर्वमच्छिद्रमस्तुइतिपठित्वाश्राद्धकर्त्तासिमन्त्रणवांव्याहृतिपूर्वि
कांगायत्रींत्रिर्जपित्वाऽर्म्भेवामीनः मधुवाताइत्यादिमन्त्रंमधुमधुमध्वितिचजपेत् ततः ॐ कृणुष्वपाजः प्रसितिंनपृथ्वींयाहिरा
जेवामवाँइभेनतृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः तवभ्रमासआशुयापतंत्यनुस्पृशधृषताशोशुचानः त
पूंष्यग्नेजुह्वापतंगानसंदितोविसृजविष्वगुल्काः प्रतिस्पशोविसृजतूर्णितमोभवापायुर्विशोअस्याअदब्धः योनोदूरेअघशंसो
योअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्रां ओषतात्तिग्महेते योनोअरातिंसमिधानचक्रेनीचातंध
क्ष्यतसन्नशुष्कं ऊर्ध्वोभवप्रतिविध्याध्यस्मदाविःकृणुष्वदैव्यान्यग्ने अवस्थिराननुहिपातुनूनांजामिमजामिंप्रमृणीहिशत्रून् त
तोभूमितिलैरास्तीर्यपित्र्यमन्त्रान्जपेत् अश्वनस्सजयेव्याहृतिपूर्वांगायत्रींसप्रणवांसकृज्जप्त्वारक्षोघ्नीःपित्र्यमन्त्रान्पुरुषसू
क्तमप्रतिरथमन्यानिचपवित्राणि रक्षोघ्नीःकृणुष्वपाजइत्याद्याःप्रमृणीहिशत्रूनित्यन्ताः स्त्रवःपित्र्यमन्त्रान्उदीरतामवरइत्यादीनि
हविष्मन्तवइत्यन्तान्द्वाविंशतिमन्त्रान् इदंनुवचनं कर्पिंजलन्यायात्त्रित्वपरं अनध्यवसायाभावात् अप्रतिरथं आशुःशिशा

पित० नइत्यादिकं जपंतं त्वानुदेवामरंतु इत्यंतं सूक्तं षोडर्चमश्मन्वत्केत्यभिधानात् यावज्जपितुंशक्यते तावदेव जपते सूक्तं तु न खंडयेत खंडं जपे
सूक्तजयासिद्धिरिति ॐ उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः असुं य ईयुरवृका ऋतज्ञास्ते नोऽवंतु पितरो हवेषु अंगि
३२ रसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम येनः पूर्वे पितरः सोम्या
